# Samarahasyopanishat

# સામરહસ્યોપનિષત્

## Document Information

Text title : sAmarahasyopaniShat

File name : sAmarahasyopaniShat.itx

Category : upanishhat

Location : doc_upanishhat

Proofread by : Mohan Chettoor

Description-comments : aprakAshitA upaniShadaH Print page 219

Latest update : July 17, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# સામરહસ્યોપનિષત્

એકદા બ્રહ્મણઃ પુત્રાઃ સનકાદયસ્તત્ત્વવિવિત્સયા પિતામહં પપ્રચ્છુઃ પ્રણિપાતપુરસ્સરમ્ । અહો પિતઃ નિરન્તરં વૈકુણ્ઠે યા લીલાસ્તા ધ્યાયમાના નિરન્તરં ચિદાનન્દેન સહ સમ્પ્રેક્ષામહે । વદ યદિ રુચિરાપદ્યતે । ચિદાનન્દરસં બ્રહ્મ કિં વદન્તિ? વ્યાપકતયા જગદ્વ્યાપ્ય તિષ્ઠતિ યત્તદ્બ્રહ્મ વદન્તિતરામ્ । આપદ્યમાનોઽસ્તિ પ્રકૃતિં પુરુષઃ । કસ્માત્પ્રકૃતિયોગિતા ભવતિ? જીવાઃ કીદૃગ્વિધાઃ? કસ્માત્સમુત્પન્ના ભવન્તિ? તેષાં લોકા અલોકાઃ કિયત્પ્રમાણાઃ? યાન્ વદન્તિ પુરાવિદઃ ।

પિતામહ ઉવાચ । નારાયણમુખાચ્છ્રુતોઽયં ધર્મઃ । શ‍ૃણુત સર્વા યૈષા સૃષ્ટિસ્સમુત્પદ્યતે । ક્ષરાક્ષરાભ્યામધિકઃ પુરુષોત્તમસંજ્ઞિતો ભક્તિગમ્ય આનન્દમયો લોકઃ સંવિરાજતે । તસ્ય પુરુષોત્તમસ્ય ઉત્તરકટાક્ષાત્સમુત્પન્ના જીવાઃ । તેષાં સ્નેહમાર્ગોઽયમાપદ્યતે । દક્ષિણકટાક્ષાદુષ્પન્નાઃ કર્મજડા આસુરા અલ્પોપાસકા ભવન્તિ । તસ્મિન્ રસિકાનન્દસ્વરૂપાત્પાર્શ્વાત્ દ્વે એવ મૂર્તી પ્રકટિતે । પ્રથમા ભક્તિસુન્દરી પ્રકટિતા । પશ્ચાન્માયાદાસી પ્રકટિતા । તયોઃ પ્રથમા અત્યન્તવલ્લભા આસ્ત । ભક્તેસ્સકાશાદુત્પન્ના જીવાઃ સ્નેહમાર્ગીયા ભવન્તિ । માયાયાઃ સમુત્પન્ના આસુરા કર્મજડા અન્યધર્મરતા એવ ભવન્તિ । યદા કર્મમાર્ગે રતિરસતાં તે આસુરા ભવન્તિ । સા ભક્તિસ્ત્રિવિધૈવ ભવતિ । એકા કર્મમિશ્રિતા દેવાનામૃષીણામુપાસકાનાં ભવતિતરામ્ । શ્રવણકીર્તનસ્મરણવન્દનસેવનોપકરણદાસ્યભાવેનાત્મસમર્પણમ્ । તે જીવા ભક્તિમાર્ગીયાઃ એવૈતે । સ એવાયં પુરુષઃ સ્વરમણાર્થં સ્વસ્વરૂપં પ્રકટિતવાન્ । તદ્રૂપં રસસંવલિતમાનન્દરસોઽયં પુરાવિદો વદન્તિ । સર્વે આનન્દરસા યસ્માત્ પ્રકટિતા ભવન્તિ । આનન્દરૂપેષુ પુરુષોઽયં રમતે । સ એવાયં પુરુષઃ સ્વયમેવ સમારાધનતત્પરોઽભૂત્ । તસ્માત્ સ્વયમેવ સમારાધનમકરોત્ । અતો લોકે વેદે શ્રીરાધા ગીયતે । તત્સ્વરૂપાસૃષ્ટિર્યા સમુત્પન્ના સા રસિકાનન્દેન સુસેવ્યતાં પ્રાપ્તા આસીત્ । પ્રમાણપ્રમેયાદસ્માન્માર્ગાદતિરિક્તોઽયં માર્ગો રસાત્મકઃ । ય એતન્માર્ગે આસક્તાસ્તે રસરૂપિણીં સૃષ્ટિમન્તરુત્પદ્યમાનાઃ ભવન્તિ ।

લક્ષ્મીનારાયણીયોઽયં સંવાદઃ । નિરન્તરં નારાયણો વૈકુણ્ઠે રમયા રહસ્યલીલાં સઙ્ગાયમાનોઽભવત્ । રમારમણો વૈકુણ્ઠે નારાયણઃ સ્વયં ધ્યાનાપન્નોઽભવત્ । તદા લક્ષ્મીઃ રહસ્યુપાસમાના તસ્ય તામવસ્થાં નિરીક્ષ્ય પ્રશ્રયાવનતા પપ્રચ્છ । કિં ધ્યાયસિ? કિં જપસિ? પરં કૌતૂહલં મે મનસિ વર્તતે । ત્વત્તઃ પરં કો દેવઃ? કો લોકઃ? યસ્ય ત્વં ધ્યાયસે પ્રતિક્ષણમ્ । તવ મનઃ કાં લીલામાપન્નં દૃશ્યતે? સ હોવાચ લક્ષ્મીં પ્રતિ । મહાલીલાસ્થાનં ક્ષરાક્ષરાભ્યામધિકં પુરુષોત્તમાધિષ્ઠાનમ્ । યત્ર સપ્તાવરણાનિ તેજોમયાનિ । યત્ર બ્રહ્માણ્ડાન્યુત્પદ્યન્તે લીયન્તે । કોટિશ અણ્ડકટાહાઃ ઉત્પદ્યન્તે લીયન્તે । યસ્ય પ્રતાપકલ્પા ઉત્પન્ના બ્રહ્મવિષ્ણુરુદ્રાદયો દેવાશ્ચ દિક્પાલાઃ કોટિશ ઉત્પદ્યમાના લીયમાનાશ્ચ ભવન્તિ ।

સા લક્ષ્મીઃ પુનરુવાચેદમ્ । અહો ક્ષરાક્ષરાભ્યામધિકસ્ય રસિકાનન્દસ્ય સ્થાનં વિસ્તરશો બ્રૂહિ । સ હોવાચ । આદૌ પુરુષોત્તમસ્ય રસિકાનન્દસ્ય અનાદિસંસિદ્ધા લીલાઃ ભવન્તિ । અનાદિરય પુરુષ એક એવાસ્તિ । તદેવ રૂપં દ્વિધા વિધાય સમારાધનતત્પરોઽભૂત્ । તસ્માત્ તાં રાધાં રસિકાનન્દાં વેદવિદો વદન્તિ । તસ્માદાનન્દમયોઽયં લોકઃ । યત્રાયં પુરુષો રમત તત્રાયં રસો વ્રજતિ । તસ્માલ્લોકે વેદે વ્રજલીલા ગીયતે । તન્મધ્યે વનાનિ દ્વાદશ સન્તિ । તેષાં પૃથક્ નામાનિ સન્તિ । તાલવનં બૃહદ્વનં કુમુદવનં લોહવનં બકુલવનં ભાણ્ડીરવનં મહાવનં ગોષ્ઠં કામ્યવનમરિષ્ટં ચ સદાશુભં દધિવનં વૃન્દાવનમિતિ । સદા આનન્દમયોઽયં લોકો વેદવિદો યં વદન્તિ । યત્ર વૃન્દાવનં સર્વકામસુખાવહં ભવતિ । યત્ર વૃક્ષા આધિદૈવિકા દેવા એવ ભવન્તિ । યત્ર સાધનવટ-ભાણ્ડીરવટૌ । યત્ર વંશીવટસઙ્કેતવટૌ । અન્યે વૃક્ષાઃ કદમ્બાદ્યા યત્ર રાજન્તે । યત્રોભયતટબદ્ધા યમુના રત્નખચિતા આસ્તે । યસ્યાં કુમુદવનાનિ રાજન્તે । યસ્યાં હંસસારસયૂથાનિ ક્રીડાપરાણિ શોભાઢ્યાનિ ભવન્તિ । યસ્યાસ્તટે કોટિશઃ કુઞ્જાશ્ચ નિકુઞ્જાશ્ચ રાજન્તે । તસ્મિન્ મણ્ડલે ગોવર્ધનોઽયં ગિરિઃ । રત્નમયોઽયં ગિરિઃ રાજમાનો ભવતિ । અયં ગિરિઃ શ્રીરાધિકાયાઃ રમણસ્થાનમ્ । સ એવાય ગિરિર્વૃન્દાવને સદા રસિકાનન્દસ્ય ક્રીડાસ્થાનં ભવતિ । તસ્મિન્ વને પશુપક્ષિગણા આધિદૈવિકીં સૃષ્ટિં પ્રાપ્તાઃ સદા સાનુભવા ભવન્તિ । આધિદૈવિકી યા સૃષ્ટિઃ સા સૃષ્ટિસ્તસ્મિન્ લોકે લોકતાં પ્રાપ્નોતિ । સા સૃષ્ટિર્દ્વિભેદા ભવતિ । એકા સંસિદ્ધા અન્યા સાધનસિદ્ધા ભવતિ । યા સંસિદ્ધા સા તસ્યા નિકુઞ્જદેવ્યાઃ સ્વસ્વરૂપાત્ સમુત્પાદ્યા ભવતિ । યા સાધનસિદ્ધા સા ભજનમાર્ગે પ્રપન્ના । ભક્તાસ્તાં લીલાં તદ્ભાવેન પ્રાપ્નુવન્તિ । રસલીલાયામુપકરણાનિ રસલીલાયામધિકરણે સખ્યશ્ચાતુર્યગુણયુતાઃ સસખીસમૂહા યૌવનસમ્પત્તિપૂર્ણા અનેકકલાકોવિદાઃ રસભાવેન પૂર્ણા ભવન્તિ । યત્ર ચન્દનવૃક્ષાણાં શ્રેણયો રાજમાના ભવન્તિ । મણિવિદ્રુમલતાગ્રથિતાઃ સુવર્ણસુગન્ધસંવલિતા વૃક્ષાસ્તેષાં પુષ્પાણિ સંરાજમાનાનિ ભવન્તિ । તત્ર સખીયૂથાનિ ભોજ્યં હસ્તં ગૃહીત્વા તિષ્ઠન્તિ । તાસુ શ્રેણિષુ લતાન્તરૈર્ગ્રથિતાનિ દ્વારાણિ મણિલતાયુતાનિ ભવન્તિ । મણિમણ્ડલં યત્ર તેજોમયં મણિમણ્ડપેન સહ ભ્રાજમાનં ભવતિ । લતાગ્રથિતા મણિસ્તમ્ભાઃ શતશો રાજમાના ભવન્તિ । તસ્મિન્ મણ્ટપે પરિતઃ સુવર્ણભિત્તિપુ જટિતાઃ મણયસ્તેજોમયાઃ સંરાજમાના ભવન્તિ । તત્રાધિત્યકાસુ ચન્દ્રકાન્તમણિના દ્યોતિતા જલમાગયો જલધારાશ્ચ ભવન્તિ । તેન જલેન પૂરિતા સુગન્ધમણિપુષ્કરિણ્યો રાજમાના ભવન્તિ । તત્ર કમલાનિ પ્રફુલ્લાનિ શ્વેતરક્ત-પીતાનિ મનોહરશોભાં દદતિ । તત્રોપસ્થિતપરાગસ્તદ્વનં વાસયતિ । તત્ર હંસયુગ્માનિ કોટિશો દેવવાણ્યા નિકુઞ્જદેવ્યા યશો ગાયન્તિ । યત્ર ભ્રમરાઃ સાનુભવા દેવવાણ્યા નિકુઞ્જદેવ્યા યશો ગાયન્તિ । તત્ર પુષ્કરિણીં પરિતો દશ દશ મન્દિરાણિ ચતુષ્કોણેષુ સન્તિ । રત્નમયકુડ્યેષુ કૃત્રિમાઃ પક્ષિણ સાનુભવા ઇવ દૃશ્યન્તે । તત્ર મધ્યે મધ્યે વૃક્ષા નિકુઞ્જતાં પ્રાપ્નુવન્તિ । સુકોમલૈઃ પત્રૈસ્તેજોમયૈ રાજન્તે । તેષાં સુગન્ધેન ઉન્મદા ભ્રમરાસ્તસ્યાઃ શ્રીરાધિકાયા યશો ગાયન્તિ । તત્ર કેચિત્ વૃક્ષઃ પુષ્પૈઃ શાખાપ્રતિશાખાઃ નમ્રા ભવન્તિ । તેષુ વૃક્ષેષુ હરિતપીતશુભ્રશ્વેતા દ્યોતિતાઃ પુષ્પગુચ્છા ભવન્તિ । તેષામધશ◌ૃઙ્ગારવત્યાદયઃ સખ્યઃ પુષ્પાણાં શય્યા રચયન્તિ । તત્ર લતાન્તરૈઃ આચ્છાદિતા વૃક્ષા નિકુઞ્જતાં પ્રાપ્નુવન્તિ । તત્ર મણિજટિતાનિ રમણસ્થાનાનિ કોટિશો રાજન્તે । યત્ર લલિતા વિશાખા સુભગા કલાવતી મનોરમા ચન્દ્રકલામોહિની ગતિરતિવિલાસિની મોહિની શાસ્ત્રગીતજ્ઞા ગુણજ્ઞા ભોગજ્ઞા ભોગપ્રદા કામપ્રદા કામદા કેલિદા સુરતકલાકોવિદા સમ્ભોગસુખદા ગતત્રપા નિઃશઙ્કુરતિદા સુતરાં સુરતાન્તનિદ્રિતા અન્યાઃ કોટિશઃ સખ્યઃ

સંવિરાજમાના ભવન્તિ । દશ મન્દિરાણિ ભક્ષ્યભોજ્યૈઃ સમ્પૂરિતાનિ ભવન્તિ । યત્ર ઘૃતપક્વાનિ પક્વાન્નાન્યનેકશો વિવિધરસયુક્તાનિ સન્તિ । તેષુ મન્દિરેષુ કટુતિક્તકષાયમાધુર્યરસા ભોગવત્યા સખ્યા કૃતાઃ સમ્પૂર્ણાઃ પ્રતિક્ષણં નૂતનાઃ ભવન્તિ । અન્ને સિદ્ધાન્નભોગાપૂપપાયસપક્વાન્નભાગાઃ શાકવિવિધ-ષડસસંવલિતા અન્નપૂર્ણયા સખ્યા સમ્પાદિતાસ્તયા નિકુઞ્જદેવ્યા સેવ્યમાના ભવન્તિ । વસ્ત્રવત્યા સખ્યા સમ્પાદિતાન્યનેકશો વસ્ત્રાણિ સમયો-ચિતાનિ મનોરમાણિ સન્તિ । ભૂષણભૂષ્યા સખ્યા રચિતાનિ ભૂષણાનિ તસ્યા નિકુઞ્જદેવ્યાઃ પ્રીણનાય તેષુ મન્દિરેષુ શય્યાભોજનશ્પૃઙ્ગારાઃ કોટિશઃ સન્તિ । તત્રાન્યે શૃઙ્ગારાદિભોગા ભોગવત્યા કૃતાસ્તેષુ મન્દિરેષુ તસ્યાઃ સુખાર્થં ભવન્તિ । તત્ર ચતુઃશ્રેણીનિ દશદશમન્દિરાણિ સન્તિ । તેષુ મન્દિરેષુ શય્યાભોજનશૃઙ્ગારા અનેકધા રચિતા ભવન્તિ । તેષુ મન્દિરેષુ સખીનાં સમૂહાઃ પૃથક્ પૃથક્ કાર્યેષુ સંલગ્ના ભવન્તિ । તેષાં મધ્યે રાસમણ્ડલં તેજોમયમાનન્દમયં તસ્યાઃ શ્રીરાધિકાયાઃ સુખાર્થં વૃન્દાનામ્ના સખ્યા તયા સમ્પાદિતં ભવતિ । તેષુ મન્દિરેષુ સખીનાં એકા યોગમાયા સખી સર્વાસાં સખીનાં સર્વત્ર એકભાવં કરોતિ । તસ્મિન્ સ્થાને સુનાદાઃ સખ્યઃ સુનાદેન સપ્તસ્વરાણિ શ્રાવયન્તિ । તત્ર બ્રહ્માણ્ડે યાઃ સિદ્ધયોઽણિમા-દયસ્તત્ર સખીરૂપં વિધાય તાં શ્રીરાધિકાં સેવમાના ભવન્તિ । સુમેરુહેમા-દ્રિમલ્માદ્યાઃ પર્વતા અન્યે યે નિધયો દેવાનાં સન્તિ તે નિધયસ્તસ્યા નિકુઞ્જદેવ્યાઃ પ્રીણનાય સખીનાં રૂપાણિ વિધાય તન્મણ્ડલં સેવન્તે । તસ્મિન્મણ્ડલે શ્રીરપિ સખીરૂપં વિધાય આકારં ગોપયન્તી સેવમાના ભવતિ । નિત્યલીલાયાં ષડૃતવોઽપિ સખીનાં રૂપાણિ વિધાય સેવમાના ભવન્તિ । કાલે કાલે તાસુ નિકુઞ્જશ્રેણિષુ સઞ્ચારિણીનાં નાનાભોગાન્ દદતિ । મેઘા નાના-સખીનાં રૂપાણિ કૃત્વા જલસેચનં કુર્વન્તિ । કામદેવોઽપિ સખીરૂપં વિધાય તત્સ્થાનં સેવમાનો ભવતિ । અહોરાત્રમપિ સ્વસ્વરૂપેણ અહનિ નિશિ ચ સેવતે તન્માણ્ડલમ્ । તદિચ્છયા ક્વચિદ્દિવા ક્વચિન્નિશા ક્વચિત્પ્રાતઃ ક્વચિત્સાયં ક્વચિન્મધ્યાહ્નઃ ક્વચિન્નિશીથં નાનાભાવેન કાલેકાલે તન્મણ્ડલં સેવતે । નાનામણય ઓષધયો વનસ્પતયો વૃક્ષા યે પૃથિવ્યાં સન્તિ તે આધિદૈવિકીં સૃષ્ટિં પ્રાપ્તાઃ સેવમાના ભવાતિ । સિન્ધવઃ સ્વરૂપેણ નિધીન્ ગૃહીત્વા તન્મણ્ડલં સેવમાના ભવન્તિ । સુમેરુહેમાદ્રિમલયાદ્યાઃ પર્વતાઃ તત્સ્થાનં સેવમાના ભવન્તિ । સખીરૂપેણાત્યન્તમણિજ્યોત્સ્નાભિર્યત્ર તત્ર અન્યે ચ બ્રહ્માણ્ડવર્તિનસ્તત્સ્થાનં દીપયન્તો ભવન્તિ । પૃથિવ્યાં યત્કિઞ્ચિદ્વસ્તુમાત્રં તસ્યાધિદૈવિકં રૂપં તત્રૈવાસ્તિ । તસ્માત્સર્વં સમુત્પન્નં ભવતિ । બ્રહ્માણ્ડે યે દેવાસ્તે આધિદૈવિકેન રૂપણ તત્સ્થાનં સેવમાના ભવન્તિ । તસ્માત્તે સર્વે સમુત્પન્ના બ્રહ્માણ્ડે ભવન્તિ । વેદાઃ સ્વઋચાભિસ્તસ્મિંસ્થાને તસ્યા નિકુઞ્જ-દેવ્યા યશો ગાયન્તિ । કામદુઘાઃ સ્વયૂથેનાધિદૈવિકં રૂપં વિધાય સંસેવન્તે । દધિદુગ્ધતક્રનવનીતઘૃતાદ્યાન્ રસાન્ ગૃહીત્વા સેવમાના ભવન્તિ । તત્ર રાસમણ્ડલમેતૈર્ગુણૈરન્યૈર્વિવિધૈઃ સમ્પૂરિતં રસિકાનન્દેન સહ શ્રીરાધિકાં સેવમાનં ભવતિ । યસ્ય રાસમણ્ડલસ્ય પરિતઃ સ્થાનાનિ દ્વાદશ સંશોભમાનાનિ ભવન્તિ । એકં મજ્જનસ્થાનમ્ । યત્રોષ્ણોદકપુષ્કરિણ્યો જલૈઃ સમ્પૂર્ણા ભવન્તિ તત્ર મજ્જનવત્યાદયઃ સખ્યો મજ્જનાર્થં સેવમાના ભવન્તિ । તત્રાન્યા પુષ્કરિણ્યઃ શીતોદકપૂર્ણા ભવન્તિ । તત્ર નિકુઞ્જાનાં શ્રેણયો રત્નાલવાલૈશ્ચન્દ્રોદ્ભવૈર્જલૈઃ સેવ્યમાના ભવન્તિ । તત્રાન્યાઃ પુષ્કરિણ્યઃ શીતોદકપૂર્ણા ભવન્તિ । ચન્દ્રકાન્તમણેરુત્પન્નૈર્જલૈઃ સેવ્યમાના મુક્તાલતા મુક્તાગુચ્છૈઃ સમ્પૂરિતા ભવન્તિ । મણિલતાસુ જ્યોત્સ્નાયાં પ્રતિબિમ્બિતાઃ પક્ષિણઃ પરસ્પરં દૃષ્ટિબન્ધેન નૃત્યં કુર્વન્તિ । દ્વિતીયં શૃઙ્ગારસ્થાનમ્ । યત્ર શૃઙ્ગારવત્યાસખ્યા અધિશ્રિતમ્ । તસ્મિન્ સ્થાને અધિશ્રિતા રઙ્ગવત્યાદયઃ સખ્યો મોદન્તે । તૃતીયં માનસ્થાનમ્ । યત્ર માનવત્યાદય સખ્યો માનં રચયન્તિ । યસ્મિન્ મન્દારવૃક્ષાઃ સુવર્ણલતાઃ

સુગન્ધા ગ્રથિતા ભવન્તિ । તેષુ વૃક્ષેષુ પુષ્પાણિ સુગન્ધસંવલિતાનિ ભવન્તિ । લતાન્તરૈરાચ્છાદિતં સ્થાનં સુગન્ધસંવલિતં મનોરમં તેજસા દીપ્યમાનં ભવતિ । હરિતપીતચ્છાયાભિઃ સંયુતં તેજસા દીપ્યમાનં ભવતિ । મન્દારનિકુઞ્જાઃ શ્રીરાધિકાયા અધિષ્ઠાનમ્ । યમુનાયાસ્તીરે ધીરસમીરે એકવટશ્ચકાસ્તિ । તસ્ય વટસ્ય પરિતો નિકુઞ્જાનાં શ્રેણયો રાજમાના ભવન્તિ । દ્વાદશ નિકુઞ્જાઃ સન્તિ । સખીનાં સઞ્ચારાઃ સૂક્ષ્મતરા લતાન્તરૈર્ગ્રથિતા ભવન્તિ । તત્ર લલિ-તાદયઃ સખ્યો રસિકાનન્દેન સહ વચનપ્રતિવચનોત્તરં દદતિ । કુઞ્જાન્તર-શ્રેણિષુ સખીનાં મધ્યસઞ્ચારોઽસ્તિ । રસિકાનન્દઃ પુરુષોત્તમઃ સ્વયમેવ પ્રણિપાતં કરોતિ । સ્વામિની મનોરમા નિકુઞ્જે સ્વયમેવાતિમાનાતુરતયા મનોભાવાપન્ના ભવતિ । સ્વભાવસંસિદ્ધાઃ સખ્યો ભાવાપન્ના ભવન્તિ । અતિરસલમ્પટો રસિકાનન્દઃ સર્વાસાં સખીનાં પ્રણિપાતં કરોતિ । અત્યન્તમગ્નાઃ સખ્યસ્તત્સુખં નિરીક્ષ્ય સુરતાનન્દે મગ્ના ભવન્તિ । ચતુર્થં ભોગસ્થાનમ્ । યત્ર સુભોજ્યા સખ્યા સેવિતમ્ । યત્ર ખાદ્યપેયલેહ્યચોષ્યરસા અનેકસ્વાદુયુતાં ભવન્તિ । અન્નપૂર્ણયા સખ્યા પાચિતાનન્નરસાનત્યુષ્ણાન્ સદ્યઃપાચિતા-નિવ શ્રીરાધિકયા સહ રસિકાનન્તઃ સેવતે । અગુરુરસાંસ્તૈલરસાન્ પુષ્પરસાન્ નાનાસુગન્ધરસાન્ શ્રીરાધિકયા સહ રસિકાનન્દઃ સંસેવમાનો ભવતિ । અન્યે તામ્બૂલાદયો લવઙ્ગકર્પૂરાદય એલાજાતીફલપૂગફલનાલિકે-રપનસસહકારભદ્રાક્ષેક્ષુરસૈઃ શર્કરાદયઃ પિષ્ટરસપૂર્ણતયા નિકુઞ્જદેવ્યા સં-સેવ્યન્તે । લલિતા રઙ્ગવતી ભોગવતી પ્રેમોત્કણ્ઠા સુરતાનન્દા સુરતરસકોવિદા ચૈતિ સખ્યઃ શ્રીરાધિકયા દત્તં પ્રસાદં ભુઞ્જતે । તત્રૈકં રસિકાનન્દ-શૃઙ્ગારસ્થાનમ્ । યત્ર પારિજાતકવૃક્ષાઃ સદા પુષ્પૈઃ પ્રફુલ્લિતા નમ્રા ભવન્તિ । તત્ર સુગન્ધસુવર્ણલતાભિઃ સંવલિતં ભવતિ । સુગન્ધમુક્તાલતાભિઃ પારિ-જાતકવૃક્ષા ગ્રથિતનિકુઞ્જતાં પ્રાપ્નુવન્તિ । તત્ર એકો ભ્રમરો દેવવાણ્યા ચાતુર્યેણ માનસ્થાને રાધિકાં પ્રતિ દૂતત્વં કરોતિ । સ ભ્રમરો રસિકાનન્દં પ્રતિ પ્રિયો ભવતિ । સ ભ્રમરઃ સ્વચાતુર્યેણ શ્રીરાધિકાયા માનાપકરણં કરોતિ । સ ભ્રમરોઽત્યન્તમનોહરચાતુર્યાસીમગુણજ્ઞઃ સ્વભાવસંસિદ્ધ સાધનસિદ્ધો ભવતિ । સ ભ્રમરો રસિકાનન્દસ્ય દૂતો ભવતિ । નિરન્તરં શ્રીરાધિકાયાઃ માનલીલાયાં સહકારી ભવતિ । તસ્માદ્રસિકાનન્દસ્યાતિતરાં વલ્લભો ભવતિ । તેઽત્ર ભ્રમરા મનોહરશબ્દેન સઙ્ગીતરસં ગમયન્તિ । તત્રૈકઃ શુકઃ સાધનસિદ્ધઃ શ્રીરાધિકાયા માનસ્થાને મન્દારનિકુઞ્જે નિવસતિ । તેન શુકેન ભ્રમરચાતુર્યં નિરીક્ષ્ય તસ્યા નિકુઞ્જદેવ્યાઃ કૃપાં નિરીક્ષ્ય અત્યાશ્ચર્યં પ્રપેદે । સ ભ્રમરસ્તેન શુકેન પૃષ્ટઃ અહો અલે ત્વં કઃ? કેન સાધનેન ત્વયેદં રૂપં પ્રાપ્તમ્? કથં શ્રીરસિકાનન્દસ્ય શ્રીરાધિકાયા દૂતત્વં પ્રાપ્તઃ?

અલિરુવાચ । અહો શુક ત્વં પૂર્વં કોઽસિ? કેન સાધનેનેદં લીલાસ્થાનં પ્રાપ્તમ્?

શુક ઉવાચ । અહં પૂર્વં બ્રાહ્મણોઽસ્મિ । વિષ્ણોરુપાસકકુલોત્પન્ન એકાત્મભાવેન મમ મનો હરિં ભજમાનં ભવતિ । એકસ્મિન્ વાસરેઽસ્મિ બ્રહ્મલોકં ગતઃ । તત્રાનન્યમાર્ગીયા ભક્તાઃ મયા દૃષ્ટાઃ । રસમાર્ગીયા ભક્તા મયા દૃષ્ટાઃ । તેષાં સઙ્ગમેન મયા નિકુઞ્જલીલા અનુભૂતાઃ । તત્રારિષ્ટે શ્રીરાધાકૃષ્ણપુષ્કરિણ્યુદ્ભવા મૃત્તિકાં ભક્ષયતા તત્ર નિરન્તરક્રીડાસ્થલં મયા શ્રુતં પૂર્વમ્ । અસ્યા મૃત્તિકાયાઃ માહાત્મ્યં મહાલીલાયાઃ પ્રાપ્તેઃ કારણમ્ । ભ્રમરો વદતિ । ત્વયા કિં શ્રુતમસ્યા માહાત્મ્યં ?

શુક ઉવાચ । શ્રીરસિકાનન્દેન વન્દિતમ્ । શ્રીરાધિકાયાઃ પ્રેમવત્યાદયઃ સખ્યસ્તસ્માત્સ્થાનાત્સમુત્પન્નાઃ । સ્વયમપિ તસ્મિંસ્થલે રાસલીલાયાઃ પ્રારમ્ભઃ કૃતઃ । તસ્મિન્ કાલે શ્રીરસિકાનન્દેન સ્વયમેવ વન્દિતં તપસા ધ્યાનેનાધિકૃતમ્ ।

તસ્માલ્લોકે વેદે વન્દિતમિદં સ્થાનમ્ । અસ્ય સ્થાનસ્ય મૃત્તિકા મયા અનુભૂતા । તેનેદં સ્થાનં પ્રાપ્તમ્ । ઇદં શરીરં તયા મૃત્તિકયા પુષ્ટં સાધનસિદ્ધં જાતમ્ । અહો ભ્રમર ત્વં કથય યદિ રુચિઃ સ્યાત્ ।
અલિરુવાચ । અહમપિ પૂર્વં ગૌડદેશોદ્ભવકાયસ્થઃ । વૈષ્ણવોઽહં નિરન્તરં પ્રેમાધિક્યેન રસિકાનન્દં સેવમાનોઽભવમ્ । ગુર્વનુગ્રહેણ સાધૂનાં રસમાર્ગીયાણાં સઙ્ગેન મયા રસમાર્ગરૂપા કથા શ્રુતા । તેષાં સાધૂનાં સઙ્ગો મયાનુભૂતઃ । તત્કથાદ્વારેણ મમ હૃદિ પ્રવિષ્ટો રસઃ । અહં રસલીલાયાં પ્રપન્નોઽભવમ્ । રસલીલાયાં પ્રવૃત્તિન્યધર્મવિસ્મારણપૂર્વિકા જાતા । તસ્યા સેવાકથાયાં પ્રત્યયો બભૂવ । યે રસમાર્ગીયા ભક્તાસ્તેષાં સમ્બન્ધાલાપકીર્તનગોષ્ઠીમાર્ગાનુભવાન્મનો ભાવમાપન્નં પ્રેમાધિક્યં સુખસપત્તિઃ ઇષ્ટતમવસ્તુપાત્રદેહાદિ યત્કિઞ્ચિત્ સમર્પયેદિતિ । ઇત્યાનુભવિકેન માર્ગેણ ભક્તૈસ્સહ વ્રજલોકે પ્રાપ્તોઽહં સર્વસઙ્ગરિક્તોઽભવમ્ । તસ્મિન્ વ્રજમણ્ડલે નિવસન્નહં પ્રતિકક્ષં પ્રતિકુઞ્જં તાં લીલાં ચિન્તયમાનસ્તદ્ભાવાપન્નો ભવામિ । તદ્ભક્તૈઃ સહ દેહાદિસુખં તતો ગ્રાહ્યં તતો દેયમિતિ મનસા વાચા તૈઃ સહ કાલોઽજ્ઞાતકાલવિષયોઽયતે । એવં મમ ધર્મઃ સિદ્ધો ભવતિ । સિદ્ધધર્મેણ શરીરં સાધનસિદ્ધં બભૂવ । તદા મમાભિલાષો મનસ એવં ભૂતો ભવતિ । યેનાભિલાષેણાહં ભ્રમરરૂપેણ તસ્યા નિકુઞ્જદેવ્યા યશઃ સઙ્ગાયામિ । પશ્ચાત્પ્રસન્નેન રસિકાનન્દેન તયા દેવ્યા મનસેપ્સિત રૂપં દત્તમ્ । ઇદં માન્યસ્થાનં દત્તમ્ । અહો શુક અહમસ્મિન્ સ્થાને શ્રીરાધિકાયા વને ક્રીડાપરો ભવેયમિતિ । તદ્વૃન્દાવનં સર્વકાલસુખસમૃદ્ધિસંપૂર્ણં શ્રીરાધિકયા સદા સેવિતં રસિકાનન્દેન સહ । તસ્મિન્ વાયવઃ શીતમન્દસુરભિભાવેન સેવમાનાઃ સન્તિ । તત્ર સ્થાને અમૃતોદા પુષ્કરિણી આસ્તે । તાસુ પુષ્કરિણીષુ કન્દુકલીલયા શ્રાન્તાઃ સખ્યો મજ્જનં કુર્વન્તિ । અતિતરાં સિતજલકલ્લોલૈર્મજ્જનક્રિયાયાં તસ્મિન્નત્યન્તરસમગ્નાનિ હંસયૂથાનિ રાજન્તે । ઉપરિ પક્ષિણાં પઙ્ક્તિઃ કલકણ્ઠૈઃ સેવ્યમાના અભ્યેતિ । અતિતરામાનન્દમગ્નાઃ સખીનાં ગણા ગુણગણાન્ સઙ્ગાયમાના ભવન્તિ । તત્રોપર્યેકં શૃઙ્ગારસ્થલં મન્દિરમસ્તિ । એકં ભક્ષ્યભોજ્યસ્થલમસ્તિ । એકં સખીસઙ્ગમોપવેશતામ્બૂલસુગન્ધરસમેવનાયૈવેતિ । એકં શય્યાગૃહં સુગન્ધમણિમયભોગાન્વિતમ્ । આધિદૈવિકેન રૂપેણ કામઃ સખીરૂપં વિધાય સ્વયમેવ સેવમાન આસ્તે । રતિસમ્ભોગાતિકલાકૌતુકાનિ નેત્રહાવભાવકટાક્ષસંવલિતકામરસભાવભેદાનિ સંયોક્ષ્યમાણકામરસસુખસમ્પત્તિયોગ્યતાં મનોભવઃ સંયોક્ષ્યમાણસુખં ચ પિબતિ । નિત્યં નિત્યનૂતનભાવભેદશૃઙ્ગારં નૂતનમ્ । રૂપં નૂતનમ્ । ક્રીડા નૂતના । વચનં નૂતનમ્ । પ્રતિક્ષણં પ્રતિક્ષણં નૂતનમેવ સુખં સખીનામ્ । નૂતનઃ સર્વો ભાવ આસ્તે । એકાદશશ્રેણયઃ સદા વસન્તસ્થાનમ્ । કિંશુકવકુલામ્રવૃક્ષા । શોભાયમાનલવઙ્ગલતાપરિશીલિતા અત્યન્તં નિગૂઢગુચ્છપુષ્પપરાગા ભવન્તિ । ઉન્મદકોકિલભ્રમરસૂક્ષ્મસ્વરસઙ્ગીયમાનાનિ સખીનાં યૂથાનિ કેશબન્ધનવસ્ત્રાણ્યતિરઞ્જિતાનિ શોભામાતન્વન્તિ । કલગીતાનિ વસન્તોદ્ભવાનિસઙ્ગીયન્તે । તસ્મિન્ સ્થાને સદા કૌતુકાવિષ્ટા ગોપ્યઃ કેસરકર્પૂરમૃગમદાગુરુરસાન્ સેચયન્ત્યો ભવન્તિ । પરસ્પરં હસ્તૈઃ કનકખચિતજટિતાઃ સર્વાઃ કન્યા મૃગમદકર્પૂરરસં સિઞ્ચન્ત્ય આપદ્યન્તે । અભિલિમ્પન્ત્યઃ પરિમૃજન્ત્યઃ અઞ્જન્ત્યો લોચને કાશ્ચિત્ કાશ્ચિત્ ગાનં ગાયન્ત્યો ગોપ્યઃ । તાં વ્રજેશ્વરીં વ્રજનાયિકાં તાઃ સખ્યો વેષશૃઙ્ગારશોભાસંરાજિતામશોભયન્ત । તસ્મિન્ વસન્તઋતુઃ સખીરૂપં વિધાય તાં વ્રજેશ્વરીમુપસેવમાન આસ્તે । યત્ર વસન્તસ્તત્રૈવ કામાવેશો જન્યતે । સ કામઃ સખીરૂપં વિધાયોપસેવમાનઃ આસ્તે । રતિભાવે સા વ્રજેશ્વરી તાં દેવીમુપસેવમાનાતિગુણગણનયા ક્વચિત્પુષ્પાવેશેન વસન્તં સુખમુપસેવતે । ક્વચિત્ફલાવેશેન વસન્ત ઉપસેવતે । ક્વચિત્કોમલાઙ્કુરાવેશેન વસન્ત ઉપસેવમાન આસ્તે । ક્વચિત્પક્ષિણાં

રવેણ ઉપસેવ્યમાન આસેવામાતનોત્ । ક્વચિલ્લતાન્તરૈરાવિર્ભાવિનોન્મદભ્રમરપિકશુકા ગીતગાનં કુર્વાણા આપદ્યન્તે । રસિકાનન્દસ્તયા નિકુઞ્જદેવ્યા સહ વસન્તોદ્ભવૈઃ પત્રાઽકુરૈઃ શય્યાં વિધાય વસન્તસુખાન્યનુભવન્નાસ્તે । વિવિધલતાન્તરેષુ પુષ્પગુચ્છસંવલિતાઃ સખ્યઃ શય્યાં વિવિધપ્રકારાં પ્રતિકુઞ્જં રચયન્તિ । ઉપકરણકામકલયા સુરતકેલિજ્ઞ ઉપતાપસુખમન્વભૂત્ । આસેદિવાન્ રતિરસસુરતાનન્દો વિવિધકલારૂપેણ પ્રતિપદ્યમાનો ભવતિ । હાવભાવકેલિકૌતુકાનિ ભવન્તિ । વસન્તઃ કામેન સહ રસલીલારતિં વિસ્તારયતિ । તત્રાનેકલતા વસન્તોદ્ભવૈઃ કુસુમૈર્વનલીલાયાં પ્રફુલ્લિતા નમ્રાઃ ભવન્તિ । નાનાકૌતુકાવિષ્ટાઃ પ્રેમવત્યાદયઃ સખ્ય અતિભાવાપન્ના બભૂવુઃ । તસ્યાં લીલાયાં ચતસ્રઃ સખ્યઃ શ્રીરાધિકાં સંસેવમાના ભવન્તિ । તસ્ય વસન્તસ્ય સુખં કેનોપવણ્ર્યતે । ચતસ્રઃ સખ્યઃ કથિતાઃ । તાસાં નામાનિ શ્ૃણુત । રઙ્ગવતી ગુણવતી ગાનવતી મનોરમા । એતાઃ સખ્યસ્તસ્મિન્ વસન્તસ્થાને સેવમાના ભવન્તિ । તદ્વસન્તસ્થાનં શ્રીરાધિકાયા અતિતરાં વલ્લભં ભવતિ । તત્સ્થાનં શ્રીરાધિકયા રસિકાનન્દેન સહ સેવ્યમાનં ભવતિ । તાઃ સખ્યસ્તસ્મિન્ સ્થાને પ્રેમ્ણો ભાવં વિસ્તારયન્તિ । રઙ્ગવતીં રસરઙ્ગલીલાં વિસ્તારયતિ । નાનાભાવેન વસન્તરઙ્ગભોગાન્ વિસ્તારયતિ । એવં નાનાભાવભેદં સુરતાનન્દં વિસ્તારયતિ । ગુણવતી રાગરઙ્ગસુગન્ધરસવીણાવેણુપ્રણાલિકયા સર્વાસાં સખીનાં કામલીલાયાઃ પ્રબોધં જનયતિ । ગાનવતી ગીતગાનગુણેન શ્રીરસિકાનન્દસ્ય શ્રીરાધિકાં પ્રીણયતિ । મનોરમા મનોરમં ભાવમાપન્ના ભવતિ । તાઃ સખ્યો ભાવાપન્નાઃ સાધનસિદ્ધા ભવન્તિ । તા ઊચુઃ । તાસ સાધનં કિં યેન સાધનેન વસન્તલીલાયાઃ સ્થાનં પ્રાપ્તમ્ । અહો ભક્તાનાં રસમાર્ગીયાણાં પુણ્યા રસમાર્ગિણી કથા નિઃશ્રેયસાય ભવતિ । યેષાં સ્નેહમાર્ગધર્મકર્મરહિતકેવલમનસા વૃત્તિઃ શ્રીરાધિકાયાં ગતિરતિભાવો ભવેત્ તે એવ તાં લીલાં પ્રાપ્નુવન્તિ । તસ્માત્તાભિર્યત્સાધનં કૃતં તત્સર્વં કથય । અહો તાઃ સખ્ય વૈવસ્વતમનોઃ પુત્ર્ય આસન્ । તાઃ કન્યાઃ પિતુર્ગૃહે નિરન્તરં ક્રીડમાના બભૂવુઃ । એકરૂપા એકસ્થિતા એકપ્રાણા એકભાવાપન્ના બભૂવુઃ । અતિગુણગણનારતાઃ પિતૃવત્સલા ભવન્તિ । તસ્ય રાજ્ઞો ગૃહે એકદા નારદઃ સમાગતઃ ।

તાઃ કન્યા નારદં દૃષ્ટ્વા પ્રણિપાતપુરસ્સરાઃ ।
તદ્રૂપમદ્ભુતં દૃષ્ટં જટામકુટમણ્ડિતમ્ ॥

વસ્ત્રાલઙ્કરણૈર્યુક્તં વીણાવાદનતત્પરમ્ ।
કૃતાઞ્જલિપુટાઃ સર્વાઃ સ્થિતાસ્તં ચોપતસ્થિરે ॥

પપ્રચ્છુસ્તં તથાભૂતં વિનયાન્નયકોવિદાઃ ।
ભગવન્ સર્વભૂતાનાં હિતાય ભુવનેઽટસિ ॥

ભવાદૃશા મહાભાગા લોકાનાં ચ હિતે રતાઃ
શરણાગતદીનાનાં કૃપાં કુર્વન્તિ સાધવઃ ॥

ઇતિ સમ્પ્રાર્થિતો નારદઃ પ્રસન્નો બભૂવ । ભોઃ પુત્ર્યઃ કો ભવતીનાં મનોઽભિલાષઃ તત્સર્વ વિસ્તરશો બ્રૂત । નારદેનૈવ ચોદિતાઃ કન્યાઃ પુનઃ પ્રોચુઃ । પિતુર્ગૃહે ભાવાપન્નૈર્ભક્તૈઃ સઙ્ગીયમાનોઽયં વ્રજલોકઃ । ત્વં વિસ્તરશો બ્રૂહિ તમ્ । શ્રુતમાત્રોઽયં રસલીલાં દદાતિ । તસ્માત્તત્સ્થાનં રસિકાનન્દેન શ્રીરાધિકયા સહ સેવિતં વર્ણય । નો મનોઽભિલાષો

ભવતિ । યદિ કૃપા સ્યાત્તર્હિ તલ્લોકવિસ્તારં વદ ।

પુનર્નારદ ઉવાચેદં તાસાં મનોઽભિલાષં જ્ઞાત્વા । શ્ૃણુત સખ્યો રહસ્યમ્ । ન કદાચિદ્વચનીયમ્ । તત્સ્થાનં કોટિસૂર્યપ્રતીકાશં તેજોમયં યત્ નિર્ગુણં બ્રહ્મ પુરાવિદો વદન્તિ । યસ્માત્પ્રજાઃ સમુત્પન્નાઃ । બ્રહ્મવિષ્ણુરુદ્રાદયો યસ્માદુત્પદ્યન્તે લીયન્તે । આત્મવિદો જ્ઞાનિન ઉત્પદ્યન્તે લીયન્તે રસમાર્ગિણો ભક્તા યં સ્થાનં પ્રાપ્નુવન્તિ ।

કન્યા ઊચુઃ । યે ગ્સમાર્ગીયાઃ ભક્તાસ્તેષાં લક્ષણાનિ વદ ।

નારદ ઉવાચેદમ્ । યે રસિકાદન્દોપાસકાસ્તે સર્વાત્મભાવેન ભજનં કુર્વતે । ભજનાનન્દોપાસકાનાં ન વર્ણો નાશ્રમો ન દેશો ન કાલોઽસ્તિ । યો ધર્માધર્મૌ પરિત્યજ્ય શ્રીરસિકાનન્દં સેવમાનો ભવતિ સઃ તાં લીલાં પ્રાપ્નોતિ । યેષાં મનસિ નિશ્ચયસ્તેષાં પ્રીતિરુત્પદ્યતે । ય એવં રસમાર્ગે પ્રપન્ના ન તેષાં ધર્માધર્મૌ બાધમાનૌ ભવતઃ । વિષયૈર્બાધ્યમાનોઽપિ ન બાધ્યતે । યેષામહોરાત્રં સેવાકથાયાં નિત્યમાસક્તિસ્તેષાં ભજનાનન્દો ભવતિ । યે તસ્મિન્ માર્ગે પ્રપન્ના ભક્તાસ્તેષાં દેયં તતો ગ્રાહ્યં યત્કિઞ્ચિદ્વસ્તુમાત્રમ્ । ભક્તાનાં ભક્તૈસ્સહ કાર્યં નાન્યૈઃ । ભક્તાનાં ભક્ત એવ જ્ઞાતિઃ । કુલવર્ણધર્માદિ સર્વે દૈવતં યત્કિઞ્ચિન્માત્રમ્ । રસગાઃ સેવકાઃ તેષાં સમ્બન્ધૌ નાન્યૈઃ । અહો વેદૈઃ પુરાણૈઃ સિદ્ધાન્તૈઃ શાસ્ત્રૈર્નાનાવાદૈઃ નાનાકર્મવ્રતોપવાસાદિભિર્યમૈર્નિયમૈશ્ચ નાનાઋષિકૃતસ્મૃતિસિદ્ધાન્તૈરેકાદશ્યુપવાસાદિવ્રતનિયમૈસ્તુલાપુરુષદાનાદિભિર્નાનાદર્શનસિદ્ધાન્તવિચારૈર્વર્ણાશ્રમોચિતધર્મૈઃ પિતૃશ્રાદ્ધાદિભિઃ સૂર્યચન્દ્રોપરાગકાલોચિતૈર્ગ્રહનક્ષત્રતારાજ્યોતિશશાસ્ત્રનિશ્ચયેન ભ્રાન્તચિત્તૈર્વિધિનિષેધસ્મૃત્યોક્તૈર્ધર્મૈર્ભ્રાન્તાઃ સન્ધ્યોપાસનકાલસંસ્કારૈર્બલિવૈશ્વદેવબલિદાનોપસર્પણૈર્વેદમાર્ગાદિભિર્નિયમૈરેતૈશ્ચાન્યૈર્ધર્મૈર્વિભ્રાન્તાસ્તેષાં રસિકાનન્દઃ પુરુષોત્તમો ન રમતે । અહો સખ્યઃ કર્મવિભ્રાન્તાસ્તાં લીલાં કદાચિન્ન જાનન્તિ । સાગ્નિકા અગ્નિવ્રતધારકાઃ કર્મજડાસ્તૈઃ સહ કદાચિત્તદ્ધર્માલાપનં ન કુર્યાત્ । અતઃ કિં બહુનોક્તેન । બ્રાહ્મણા યે ભક્તિમાર્ગં ન વિદન્તિ તેષાં સમ્ભાષણં સ્પર્શં ન કુર્યાત્ । કદાચિન્નાલપેત્ ।

તા ઊચુઃ-

ભગવન્ સર્વભૂતાનાં હિતાય ભુવનેઽટસિ ।
શરણાગતદીનાનાં કૃપાં કુર્વન્તિ સાધવઃ ॥

અતઃ પ્રાર્થયામો મહાલીલાયા દર્શનં યત્ર રસિકાનન્દપુરુષોત્તમો રમતે । એવં પ્રાર્થિતો ભગવાન્ નારદસ્તાસામત્યાનન્દમયલોકં દર્શયામાસ । મહામન્ત્રવિદ્યયા કૃતસંસ્કારાસ્તાઃ સખ્યસ્તસ્યાં લીલાયાં ભાવાપન્ના બભૂવુઃ । તા ઊચુઃ । નારદેનોપદિષ્ટાં વિદ્યાં કથય યયા વિદ્યયા શ્રીરસિકાનન્દસ્ય શ્રીરાધિકયા સહ ક્રીડાસ્થાનં દ્રક્ષ્યામઃ । સ હોવાચ । શ્ૃણુત સખ્યઃ । યસ્યાં વિદ્યાયાં સદ્યઃ સમભ્યસનેન મહાવનવિહારસ્પર્શનં ભવતિ । કૃપાસમભ્યસનાત્ રમણાનન્દલોકસ્પર્શનં ભવેત્ । ક્લીં સકલકામદાત્રીં ભ્રૂં ભોગદાત્રીં હ્રીં રસિકાનન્દવિલાસદાત્રીં હ્રીં રતિકેલિકલાકોવિદાં બાં વૃન્દાવનશશિનીં સ્રું સુરતાનન્દરૂપાં શ્રીં મનોહારિણીં નૃં નિકુઞ્જકેલિકૌતુકાવિષ્ટદેહાં ભ્રૂં ભોગાત્મિકાં સ્ત્રાં સખીનાં સુખદાયિનીં હ્રીં રાસકેલિકલાત્મિકાં ધ્યાયેત્ । ક્લીં નમઃ । ઇમાં વિદ્યાં ભોગાત્મિકાં નારદેન દત્તાં તાઃ કન્યા જગૃહુઃ । રસિકાનન્દપ્રાપ્ત્યર્થે ગૃહીત્વા તાં વિદ્યામભ્યસેત્ । તાસાં પિતુર્ગૃહે એકં વનં નાનાપુષ્પવૃક્ષૈઃ સુશોભાઢ્યમ્ । તત્ર પુષ્પલતાનાં નિકુઞ્જાઃ સુશોભાઢ્યાઃ સંરાજમાના મનોહરાઃ સન્તિ । તત્ર

તાઃ કન્યા ઇમાં વિદ્યામભ્યસ્તવત્યઃ વૃન્દાવનબુદ્ધ્યા । અહોરાત્રં તદ્ધ્યસ્તદાલાપાસ્તદ્વિચેષ્ટાસ્તદાત્મિકાઃ તસ્યાં લીલાયાં મગ્ના નાન્યં દેહવિષયં વિદુઃ । ક્વચિદ્રુદન્ત્યસ્તચ્ચિન્તયા ક્વચિન્નૃત્યન્ત્યઃ ક્વચિદલૌકિકાઃ કથા વદન્ત્યઃ ક્વચિદ્ભક્તૈસ્સહ અનુશીલયન્ત્યઃ ક્વચિત્તસ્મિન્ વને વૃન્દાવનશોભાં વિધાય તદ્ભક્તૈઃ સહ રાધારસિકલીલયોરનુભવં કુર્વન્તિ । એકદા તાસામાશ્વિન્યાં પૌર્ણમાસ્યાં મહાલીલાયા મહોત્સવકાલે નિકુઞ્જદેવ્યા દર્શનં પ્રદત્તમ્ । અશરીરયા વાણ્યા વરો દત્તઃ । ભવતીનાં મનોઽભિલાષો મયા જ્ઞાતઃ । યદિ મમ લોકદર્શનાકાઙ્ક્ષા સ્યાત્ । વૃન્દાવને ગોવર્ધનાદ્રિશિરસિ પુષ્કરિણીં વિધાય તત્ર મમ ધ્યાનાપન્નૈર્ભૂયતામ્ । મમાનુગ્રહેણ મમ લીલાવલોકો ભવિષ્યતીતિ તા વરેણ છન્દયિત્વા અન્તર્દધે । તાઃ કન્યાસ્તત્ર ગત્વા તથાકુર્વન્ । તસ્મિન્ ગોવર્ધને અપ્સરઃપુષ્કરિણ્યાં તાઃ સર્વાઃ પૂર્વોક્તયા વિધયા શ્રીરાધિકાયા ભજનં ચક્રુઃ । ઇત્થં ભજનમાપન્નાઃ કન્યા માસેનૈકેન તં લોકમપશ્યન્ । વૃન્દાવનં શ્રીમત્ સર્વકાલસુખાવહમ્ । યત્ર ષડૃતવઃ આધિદૈવિકેન રૂપેણ સેવમાના ભવન્તિ । યત્ર રત્નજટિલા ભૂમયો મણિજ્યોત્સ્નાભિર્દીપ્યમાના ભવન્તિ । યત્ર ફલૈઃ પુષ્પૈઃ પત્રૈર્મણીનાં સ્તમ્ભાઃ શતશો રાજમાના ભવન્તિ । યત્ર મણીનાં લતા ભ્રાજમાના વિદ્રુમલતાભિઃ ગ્રથિતા ભવન્તિ । સુવર્ણલતાગ્રથિતા મુક્તાલતા મુક્તાગુચ્છૈઃ પૂર્યમાણાઃ ભવન્તિ । યત્ર સખીનાં યૂથાનિ પરસ્પરં શ‍ૃઙ્ગારરસેન ક્રીડમાનાનિ ભવન્તિ । યત્ર ફલૈઃ પુષ્પૈઃ સુકોમલૈઃ પત્રૈર્વિરાજમાના વૃક્ષા લતાભિઃ સઙ્કીર્ણા ભવન્તિ । યત્ર મધ્યશ્રેણીષુ સખીનાં ચારા અતિસુશોભમાના ભવન્તિ । યત્ર બકુલવૃક્ષાણાં વનાનિ કુત્રચિત્સંરાજમાનાનિ ભવન્તિ । કુત્રચિન્મન્દારવૃક્ષાઃ સંરાજન્તે । અમ્લાનપુષ્પૈર્નારઙ્ગૈઃ સુશોભાઢ્યા ભવન્તિ । કુત્રચિત્પારિજાતકવનાનિ સુગન્ધસંવલિતાનિ સન્તિ । તત્ર વનેષૂન્મદાઃ કોકિલા ગાયમાના ભવન્તિ । કુત્રચિન્મન્દારવૃક્ષાઃ પુષ્પપરાગૈશ્ચિતા વસ્ત્રૈશ્છાદિતા ઇવાસન્ । તાસુ વૃક્ષાણાં શ્રેણીષુ તાઃ કન્યા એકં મહાસ્થાનં દદૃશુઃ । પઞ્ચવિંશદ્યોજનાયતં પરિતો વાપ્યો દશદશચતુષ્કોણેષુ નાનારસૈઃ સમ્પૂર્યમાણા ભવન્તિ । દશ વાપ્યઃ કેસરકર્પૂરમૃગમદરસૈઃ સમ્પૂર્યમાણા ભવન્તિ । દશ વાપ્યોઽગુરુરસસમ્પૂર્યમાણા ભવન્તિ । દશ વાપ્યઃ સુગન્ધપયસા સમ્પૂર્ણા ભવન્તિ । દશ વાપ્ય ઉષ્ણોદકેનાતિનિર્મલેન સુગન્ધેન સમ્પૂર્યમાણા ભવન્તિ । તત્ર દશ વાપ્યો મૃજ્જલેન સુશીતલેન સમ્પૂર્યમાણા ભવન્તિ । તત્ર મધ્યમણ્ડલે પઞ્ચવિંશદ્યોજનાયતે સુશોભાઢ્યે મણિજ્યોત્સ્નાભિઃ સંવેષ્ટિતે સખીનાં યૂથાનિ યત્ર ક્રીડાં કુર્વન્તિ તત્ર પરિતો નિકુઞ્જાનાં શ્રેણયઃ સૂક્ષ્મલતાન્તરૈઃ સંવેષ્ટિતા ભવન્તિ । તત્ર મધ્યે એકં રત્નાસનં સુખસમ્પૂરિતં સુરતાનન્દસ્થાનં ભવતિ । યત્ર પ્રેમવતી સ્નેહવતી ગુણવતી ઉત્કણ્ઠાવતી ઉત્સાહવતી કલાવતી ગાનવતી મનોરમા સુરતાનન્દા સુખસંવલિતા નિદ્રાસંવલિતા નિઃશઙ્કા લજ્જાગતત્રપા સુભગા શ‍ૃઙ્ગારવતી સમ્ભોગવતી ભાવશુદ્ધા એતા અન્યાશ્ચ સખ્યસ્તત્સ્થાનં સેવમાના ભવન્તિ । નિરન્તરં રાસકેલિકૌતુકેન નૃત્યપરા સુગન્ધકલાવતી સઙ્ગીતજ્ઞા અઙ્ગસંવલિતા રાગજ્ઞા ગુણજ્ઞા એતાઃ અન્યાશ્ચ સિદ્ધાન્તસ્થાનં સેવમાના ભવન્તિ । તત્ર વિહઙ્ગમાનાં પઙ્ક્તયો નાનારૂપૈઃ કલશબ્દૈઃ સઙ્ગાયન્ત્યો ભવન્તિ । ક્વચિત્ સખીમણ્ડલે તાઃ રાસક્રીડાં કુર્વન્તિ । ક્વચિત્ કુઞ્જાન્તરે પુષ્પપલ્લવૈઃ રચિતશય્યાયાં ક્રીડાં કુર્વન્તિ । ક્વચિન્નાનાપુષ્પૈરઙ્ગપ્રત્યઙ્ગેષુ પરસ્પરં શ‍ૃઙ્ગારં કુર્વન્તિ । ક્વચિત્ પુષ્પમાલાભિરઙ્ગપ્રત્યઙ્ગૈઃ શ‍ૃઙ્ગારરસં કુર્વન્તિ । ક્વચિત્કુઞ્જાન્તરે શ‍ૃઙ્ગારરસં કૃત્વા સુખં સંસેવમાના ભવન્તિ । તાઃ કન્યાઃ શ્રીરાધિકારસિકં દૃષ્ટ્વા અત્યન્તમેવ મુમુહુઃ સ્તુતિં ચક્રુઃ । અતિતરાં નમ્રાઃ કન્યાઃ પ્રશ્રયાવનતાઃ નમશ્ચક્રુઃ વિનયભાવાપન્ના બભૂવુઃ । તયા શ્રીરાધિકયા સ્વરૂપં પ્રદત્તમ્ । તાસાં મહાલીલાયાં યોગ્યતા પ્રદત્તા । અહો સત્સઙ્ગમાહાત્મ્યં કેન વર્ણ્યતે ।

દર્શનાત્સ્પર્શનાદાલાપાદ્ભોજનાચ્છયનાદાસનાદ્ભોજનોચ્છિષ્ટકૃપાપ્રસાદાત્ રસિકાનન્દેન સહિતાયાઃ શ્રીરાધિકાયાઃ કૃપા ભવતિ । અહો રસિકાનન્દોપાસકાનાં લક્ષણાનિ વદ યેનાહં સતાં સઙ્ગે વિચરામિ । અહો શ્રુતમહાલીલાઃ! યે નિરન્તરં સેવમાના ભક્તા વેદમાર્ગકર્માતિરિક્તા ભવન્તિ તે રસિકાનન્દમાર્ગમાચાર્યોક્તમધીત્ય યો વૃન્દાવનોક્તમાર્ગઃ સખીભિરુપાસિતઃ તાસાં માર્ગે પ્રપન્ના ભવન્તિ । અહો નાનાસ્મૃત્યુક્તાન્ ધર્માન્ યે કુર્વન્તિ ત ઇહ સંસારે વિચરન્તિ । યે પિતૄન્ યજન્તિ તે પિતૃલોકં પ્રાપ્નુવન્તિ । દેવાન્ યે યજ્ઞકર્મણા યજન્તિ તે દેવલોકં સ્વકર્મોપાર્જિતં યાન્તિ । યે બ્રાહ્મણાઃ બ્રહ્મવર્ચસમુપાસમાનાસ્તે બ્રહ્મલોકં પ્રાપ્નુવન્તિ । ગાયત્રીં ય ઉપાસતે તે સૂર્યમણ્ડલે લયં યાન્તિ । યેષાં મધ્યે શૈવાઃ શિવોપાસકાસ્તેષાં પ્રમાદેનાપિ સમ્ભાષણં ન કુર્યાત્ । યે કૈવલ્યધર્મરતાસ્તેષાં સમ્ભાષણં સ્પર્શનં ચ કૃતં ચેત્તર્હિ સવાસાઃ જલમાવિશેત્ । અહો રુદ્રોપાસકા યે તમોધર્મરતાસ્તેષાં સમ્ભાષણં સ્પર્શનં ચ કૃતં ચેત્તર્હિ સવાસા જલમાવિશેત્ । યક્ષોપાસકાઃ સદા ત્યાજ્યાઃ । ગણપતિદુર્ગાયાઃ ભજનભેદા અનેકશઃ સન્તિ । તાન્ યે ભજન્તિ તેષાં સમ્ભાષણં સ્પર્શનં ચ કૃતં ચેત્તર્હિ સવાસા જલમાવિશેદ્રસિકાનન્દોપાસકઃ । કર્મકાણ્ડોપાસકા રસિકાનન્દમાર્ગં ન જાનન્તિ । જૈનબૌદ્ધચાર્વાકમીમાસકવેદાન્તન્યાયપાતઞ્જલમતાન્તરાણિ તેષાં સિદ્ધાન્તં કુર્વન્તિ । યે ભ્રાન્તા ભજનમાર્ગમવિદુષઃ પણ્ડિતમાનિનસ્તેષાં સમ્ભાષણં સ્પર્શનં ચ ન કુર્યાત્ । વિષ્ણુભજનરતા નારાયણોપાસકાઃ શ્રવણકીર્તનસ્મરણવન્દનરતા મત્સ્યકચ્છપવરાહનૃસિંહવામનપરશુરામરામોપાસકા કૈણવાસ્તેઽપિ તં લોકં ન જાનન્તિ । તસ્માત્તેષાં સઙ્ગસ્ત્યાજ્યઃ । વિષ્ણુભક્તાઃ જ્ઞાનવૈરાગ્યયુક્તા અનન્યાશ્રયયુક્તાસ્તેઽપિ તં માર્ગં ન જાનન્તિ । સૂક્ષ્મતરમાર્ગો બ્રહ્માદિભિર્નારદાદિભિઃ રુદ્રાદિભિઃ સૃષ્ટિકર્તૃભિઃ પ્રજાપતિભિરપ્યગમ્યઃ । તસ્માત્તયા શ્રીરાધિકયાનુગૃહીતાસ્તં રસં જાનન્તિ નાન્યે । યદા યસ્ય દેવતાન્તરભજનં ભવતિ વૈણવેષુ વિદ્વેષો ભવતિ તાન્ રસિકાનન્દપુરુષોત્તમો ન સ્પૃશેત્ । અહો રસિકાનન્દોપાસકાનાં ક્રિયાઃ શ ृણુત । યે મનસિ ભજને સુનિશ્ચયાસ્તલ્લીલોપાસકાઃ સત્કથાક્ષિપ્તમાનસાઃ તલ્લીલોપાસકાનાં સઙ્ગેન કથાકીર્તનાસક્તાંસ્તે તત્સેવાતદ્ભાવેન શોકમોહભયોદ્વેગરહિતા અમત્સરા અહમ્ભાવરહિતા જ્ઞાનવૈરાગ્યસહિતા વૃન્દાવનલીલોપાસકા ભવન્તિ । રસલીલાયાં નિમગ્નાનાં તેષાં તદ્ભજનમેવ સાધનં તદ્ભજનમેવ જ્ઞાનં તદ્ભક્તા એવ જ્ઞાતિઃ તદ્ભક્તા એવ કુલં એવં રસલીલાપ્રપન્નો ભવતિ । ગૃહાદિધર્માન્ ત્યક્ત્વા વર્ણાશ્રમધર્માન્ ત્યક્ત્વા જાતિકુલધર્માન્ ત્યક્ત્વા મોક્ષધર્માન્ ત્યક્ત્વા સંન્યાસાધર્માન્ ત્યક્ત્વા દેશકાલકર્મસ્વભાવસંસિદ્ધાન્ ધર્માન્ ત્યક્ત્વા રસલીલામભ્યસેત્ । રસલીલાયાઃ સેવાવધિં કથય યેન વિધિના મહાલીલાયાઃ પ્રાપ્તિર્ભવતિ । તદ્ભક્તાનાં દર્શનં ભવેત્ । સ હોવાચ । રસલીલાયા ભજનં ત્રિવિધાત્મકમ્ । એકં ધ્યાનમયમ્ । પ્રતિકુઞ્જં પ્રતિવૃક્ષં ધ્યાનાપન્નો ભવેત્ । રાત્રૌ દિવા રસિકાનન્દં શ્રીરાધિકયા સહ હૃદિ ચિન્તયમાનઃ સખીભાવેન ભાવાપન્નો ભવેત્ । તદનુભાવેન પુલ્લિઙ્ગં વિધૂય મહાલીલાયાં લયલીયમાનો ભવેત્ । દ્વિતીયં ભજનપ્રકારં શ ृણુત । યેન ભજનેન રસિકાનન્દઃ શ્રીરાધિકયા સહ દૃષ્ટિપથમાપદ્યેત ષોડશમમયં વા ધાતુમયં વા રસિકાનન્દસ્વરૂપં શ્રીરાધિકયા યુતં વિધાય શય્યાભોજનશ ृઙ્ગારૈ રાજોપચારે સ્નેહભાવેન ભજનં કરોતિ અહોરાત્રં તદ્ભાવેનાપન્નો ભજનં કરોતિ સ તાં લીલાં પ્રાપ્નોતિ । યે રસિકાનન્દોપાસકા ભક્તાસ્તેષાં સેવાયા વ્રતધારણમ્ । અહો ભક્તાનાં સેવાસ્તુ દુર્લભતરાઃ । યેષાં હૃદિ નિશ્ચય આપન્નસ્તેષાં શ્રીરસિકાનન્દઃ શ્રીરાધિકયા સહ પ્રસન્નો ભવતિ । ભક્તાનાં સેવાસ્તુ અત્યન્તદુર્લભા ભવન્તિ । યે નિષ્કર્મમાર્ગિણો ભક્તિમાર્ગં કેવલમાપન્નાસ્તે સેવ્યાઃ પૂજ્યા એવ ભવન્તિ । યે અન્યધર્મં ત્યક્ત્વા રસિકાનન્દસેવકાસ્તે ભક્તા નાન્યે । ભક્તાઃ સુસેવમાના ભવન્તિ । તસ્માત્સુસેવમાના

ભક્તાઃ કૃપાં કુર્વન્તિ । સાધૂનાં સમચિત્તાનાં કૃપયા મહાલીલાયા દર્શનં ભવતિ । તસ્માત્ રસિકાનન્દં હૃદિ સ્થાપ્ય સાધૂનાં સઙ્ગેન વૃન્દાવનરહસ્યમાર્ગાનુસારેણ સુસેવમાનો ભવતિ । અતિરસમગ્ના ભક્તા નાન્યં વિદન્તિ । અહો પુનર્મહાલીલાયા વર્ણનં શ્રુત્વા વયં ન તૃપ્યામઃ । શૃણુત પુત્રાઃ । વનવિહારલીલા પૂર્વં નારાયણેન લક્ષ્મ્યગ્રેન કથિતા તદા શ્રુતં તદહં વર્ણયામિ । અહો મહાલીલાયાઃ સ્થાનં નારાયણેનાપિ ન દૃષ્ટમ્ । યત્રાષ્ટૌ મણયઃ સંરાજમાના ભવન્તિ । ચન્દ્રકાન્તમણિનામૃતેન પુષ્પપલ્લવિતા વૃક્ષાઃ સેવ્યમાના ભવન્તિ । લતાનામાલવાલાનિ સૌવર્ણાનિ દીપ્યમાનાનિ જલૈઃ પૂર્યમાણાનિ ભવન્તિ । તત્ર સૂર્યકાન્તમણિના પ્રદીપ્યમાના વૃક્ષલતાઃ શોભાયમાના ભવન્તિ । મણિલતાભિર્ગ્રથિતાનિ મન્દિરાણિ તેજોમયાનિ સંરાજન્તે । પ્રસારિતલતા વૃક્ષૈર્ગ્રથિતા નિકુઞ્જતાં પ્રાપ્નુવન્તિ । તેષુ નિકુઞ્જેષુ લતાનાં નાનાર ઙ્ગાઃ સન્દીપ્યન્તે । તત્ર શૃઙ્ગારવત્યાદયઃ સખ્યઃ શય્યોપકરણાનિ રચયન્તિ । સુશોભાયમાનાઃ પક્ષિણઃ કલશબ્દેન શ્રીરાધિકાયાઃ શૃઙ્ગારરસં સઙ્ગાયન્તો ભવન્તિ । પિકયૂથાનિ મનોહરેણ શબ્દેન દેવવાણ્યા તસ્યાઃ શ્રીરાધિકાયા રમણલીલાં ગાયન્તિ । તત્ર મધ્યેમણ્ડલં તેજોમયમસ્તિ । હાટકમયાસ્તેજોભૂમયસ્તેજોમયાઃ સંવિરાજન્તે । યત્ર ભૂમૌ પરિત અષ્ટૌ મણયઃ સન્તિ તેષાં પ્રસારિતા લતા સુવર્ણલતાભિર્મુક્તાલતાભિર્ગ્રથિતાઃ પુષ્પૈઃ પલ્લવૈઃ સંવલિતા ભવન્તિ । પ્રતિમણ્યેકૈકં મન્દિરં સકલસિદ્ધવસ્તુસમન્વિતં ભવતિ । રતિમન્દિરે શરવ્યાઃ પયઃફેનનિભાઃ સંરાજન્તે । તત્રાન્નાનિ વિવિધાનિ અન્યપૂર્ણયા સખ્યા પાચિતાનિ । પ્રતિક્ષણં નૂત્નાનિ શ્રીરાધિકાયૈ ભોજ્યાર્થે ભવન્તિ । તત્ર સુગન્ધરસિકયા સખ્યા રચિતાઃ સુગન્ધરસા અગુરુચન્દનકેસરીમૃગમદકર્પૂરાદ્યા અનેકસુગન્ધરસાઃ શ્રીરાધિકયા સમ્ભોજ્યા ભવન્તિ । તત્ર શૃઙ્ગારવત્યા સખ્યા રચિતાઃ શૃઙ્ગારા વસ્ત્રાલઙ્કારસંયુક્તાઃ સુભગા નાનાવસ્તુમયાઃ શ્રીરાધિકાર્થે કલ્પિતાઃ સુભોજ્યા ભવન્તિ । રઙ્ગવત્યા રચિતા રતિરઙ્ગા વચનપ્રતિવચનમયા ઇન્દ્રિયાદિભાવમયાઃ શ્રીરાધિકાયા ભોગાર્થે ભવન્તિ । ગાનવત્યા રચિતા નાનારાગરઙ્ગભોગાઃ સમયોચિતાઃ પ્રતિક્ષણં નૂત્નાઃ શ્રીરાધિકાર્થે સુભોજ્યા ભવન્તિ । નૃત્યકવત્યા રચિતાઃ સુગન્ધકલાઃ શ્રીરાધિકાર્થે કલ્પિતા ભવન્તિ । તત્ર સ્થાને ભોગવતી નામ્ના સખી નાનાભોગાન્ કલ્પયતિ । કટુતિક્તમધુરકષાયાઃ સુસ્વાદા ભોગાઃ શ્રીરાધિકાયા ભોજ્યાપન્ના ભવન્તિ । રતિવતી નામ્ના સખી નાનારતિસુખમુત્પાદયતિ । રતિકલાકૌતુકાનિ મનોજ્ઞાનિ ભવન્તિ । સુરતાનન્દા સખી નાનાસુરતકલાં શ્રીરાધિકાયૈ કલ્પયતિ । મનોજ્ઞા સખી નાનામનોભાવં દદાતિ । સુખદા સખી નાનાસુખં રસિકાનન્દં પ્રતિ રાધિકાર્થે કલ્પયતિ । તાઃ સર્વાઃ સખ્યઃ સુખકેલિકલાનુભાવેન રાસલીલાં કુર્વન્તિ । તસ્મિન્ મધ્યમણ્ડલે સુરચિતા સખી કસ્મિંશ્ચિત્સમયે રાસલીલાં રચયતિ । તત્ર મધ્યે કામેન સેવિતં તેજોમયમાસનં કલ્પયિત્વા શ્રીરાધિકયા સહ રસિકાનન્દં સમાવેશયતિ । તત્ર પરિત એતાઃ સખ્યઃ ક્રીડાકલાં દર્શયન્તિ । કલાવતી ગુણવતી પુષ્પવતી અઙ્ગચપલા સુરતકલાકોવિદા રસકલાભિજ્ઞા રસભાવજ્ઞા વિપરીતસુરતનૃત્યકલાકોવિદા એતાશ્ચાન્યાઃ સખ્યઃ તસ્મિન્ મણ્ડલે સ્વાન્ સ્વાન્ ગુણાન્ પ્રકટીકૃત્ય રસિકાનન્દં સેવમાનાઃ ભવન્તિ । સાધનસિદ્ધાઃ સંસિદ્ધાઃ સખ્ય અનેકરૂપૈસ્તાભ્યાં સુસેવ્યમાનાઃ ભવન્તિ । યાદૃશા ભક્તાસ્તાદૃશં સુખં તાદૃશો લોલાભાવશ્ચ ભવેત્ । પુનસ્તે ઊચુઃ । મહાસ્થાનં કિયત્પ્રમાણં ? સંસિદ્ધોઽયં રસઃ । સંસિદ્ધઃ કીદૃગ્વિધઃ? તે સંસિદ્ધા ભક્તાઃ કીદૃગ્વિધાઃ? તેષાં રૂપં કીદૃગ્વિધં? રસિકશિરોમણિરાનન્દાત્મકપુરુષોત્તમઃ શ્રીરાધામાનન્દરમણારન્દરૂપાં તેન રૂપેણ સહ બુભુજે । નિત્યાનન્દરૂપેણ સહ પુરુષોત્તમો નિત્યાનન્દરૂપઃ સઙ્ક્રીડમાનો ભવતિ । સઃ એવં રૂપં ગોપિકાસ્વાવિર્ભાવેન ક્રીડયિષ્યતિ । પૃથગ્રૂપેણ ક્રીડમાના અભ્યેતિ । તદ્ભાવે ક્રીડિષ્યમાણા ગોપ્યઃ પૃથક્ સઙ્ક્રીડમાના ઇવ એકમેવ

સ્થાનમધ્યાસતે । તેષાં સ્થાનં કિયત્પ્રમાણં? કીદૃગ્વિધા ભક્તાઃ? ક્રીડમાનં રૂપં તાભિઃ સમ્પીયમાનસૌષ્ઠવં કિમ્?

પુનરુવાચેદમ્ । રહસ્યમતિતરાં સૌષ્ઠવમ્ । ષડિધોઽયં રાસઃ । તેષામેવ રાસલીલાયામાપદ્યમાનં રૂપમ્ । રહસ્યસ્થાનં મહાલીલાયાં શતયોજનાયતં પદ્મરાગજામ્બૂનદસુવર્ણખચિતમ્ । નીલમણિના પરિધયઃ શોભાઢ્યા એવાસન્ । મધ્યમધ્યે પુષ્યરાગમણીનાં સ્થાનં સમ્ભ્રાજતે । તેષામતિતરાં મણિજ્યોત્સ્નાં રાજમાનામભ્યેત્ય તસ્માત્ પરિતઃ શતકુઞ્જવિદ્રુમલતાઃ સુવર્ણસુગન્ધલતાગ્રથિતાઃ સુસુગન્ધાઢ્યમાતન્વન્ । તેષામેવ મણીનાં શક્તયો વિરાજન્તે । પુષ્પિતવૃક્ષલતા સુગન્ધરસામ્યેતિ । તત્સુગન્ધાવેશિતાઃ સખ્યો ભાવાપન્ના રમણરસરમણે રસરમણાનન્દે રસે મગ્ના ભક્તાઃ પ્રેમવત્યાદયો લીલાયાં યોગ્યતામભિયન્તિ । રતિક્રીડાયામાનન્દરસઃ સમ્ભવતિ । તે સખ્યસ્તસ્માદુત્પન્ના ભવન્તિ । શૃઙ્ગારરસં દૃષ્ટિગોચરમુપસમ્પદ્યન્તે । તસ્માત્ રમણાનન્દાદુત્પન્ના આત્માનન્દરૂપિણઃ । યત્ર યત્ર તયા દેવ્યા સ્વાવેશેન સુખં સુસંસિદ્ધોઽયં રસઃ । તાસાં ગોપીનાં ગૃહઙ્ગૃહમાપદ્યમાનઃ પ્રતિરૂપં સુખં સંયોજયતિ । તાસામેવ રસાવેશેન રાસસ્થાનં શતયોજનાયતં પદ્મરાગમણિજટિલનીલમણિના વિરાજિતં જામ્બૂનદમણિના સુવર્ણેન જટિતં શતશો મણિખચિતમ્ । તસ્મિંસ્થાને મણિસ્તભાઃ શતશો વિરાજમાનાસ્તસ્યા નિકુઞ્જદેવ્યાઃ સ્વાવેશેન અનેકશો રૂપાણિ કૃત્વા આત્માનં વિભજ્ય સ્વરસભોગસુખં સમ્ભુઞ્જતે । યથાયથા રૂપાણિ તથાતથા રસિકાનન્દસ્ય રૂપાણિ સુખં સમ્ભોક્ષ્યન્તે । તેષુ તેષુ રૂપેષુ ક્રીડન્ત્યસ્તાઃ નિકુઞ્જદેવ્યાઃ સ્વામિભાવેન વ્રજલીલાયાઃ સુખમાપદ્યન્તે । સ એવ રાસઃ । આનન્દાદ્રમણાનન્દોઽયં યોજ્યતે । ચન્દ્રાવલીચન્દ્રભાગાસુશ્રોણીસુભગાદ્યાઃ શતશો ગોપભાર્યા વેદઋચઃ । વેદપુરુષા ઇમે ગોપાસ્તાસાં ગોપીનાં સ્વામિન્યા આત્મસ્વરૂપેણ સ્વયમેવ રમણારન્દેનાયોજ્યન્ત । અગ્નિના પ્રજ્વલિતા રજ્જુર્દૃશ્યમાના અગ્નિરેવાભાતિ । ગોકુલોઽયમગ્નેઃ સંયોગાદેવાભાતિ । તા ગોપ્યસ્તદ્ભાવેન રસં અનુભવન્ત્યસ્તસ્યા નિકુઞ્જદેવ્યા ભાવમાપન્ના આસન્ । દ્વયો રાસયોરિદં ભવતિ । તૃતીયે રાસે તુ ગહં ગહં પ્રતિ સ્વયંસ્વયમેવ રસિકાનન્દસ્વરૂપે ક્રીડિતા આસન્ । સ્વાનન્દાવિર્ભાવાય તાસાં યોગ્યતાં નિરૂપયતિ । સુખમનુભવન્ત્ય આત્મભાવ એવાસન્ । ચતુર્થે તુ ગોરસવિક્રીડા ગોપ્યશ્ચન્દ્રાવલીપ્રભૃતયોઽનેકશો દાનલીલયા નિકુઞ્જદેવ્યા સ્વાવેશેન સુખમનુભૂય તદ્વચનાદભીષ્ટાનિ પ્રતિપદ્ય યોગ્યાનીન્દ્રિયાણિ પરસ્પરસુખં ભુઞ્જાનાસ્તસ્યા નિકુઞ્જદેવ્યા રસિકશિરોમણિના સહ સુખં સ્વયમેવ રૂપેણ અનુભવન્તિ । પઞ્ચમી મહાલીલા સ્વયમેવ વૃષભાનુગૃહે પ્રકટિતા । તાં તયા સહ પુરુષોત્તમરસિકાનન્દોઽયં સ્વયમેવ વ્રજલીલાયાં પ્રકટિતવાન્ । સઃ એવ સુખં રમણાનન્દરૂપેણ સમ્ભોક્ષ્યમાણોઽભવત્ । પરસ્પરબાલલીલાસુખયુગ્મરૂપે એકમેવ રૂપં ભવતિ । એવં તસ્મિન્ વૃષભાનુગૃહે સ્થાનાનિ શતશઃ પદ્મરાગકુડ્યાનિ ગૃહાણિ તપ્તસુવર્ણપરિધીનિ વિરાજમાનાનિ ભવન્તિ । લલિતાવિશાખાશૃઙ્ગારવત્યાદયઃ સ્વયમેવ પ્રકટિતા સખ્યઃ સ્વયમેવ સ્વરસં પ્રાપ્તાઃ રસમાનન્દાત્મકમનુભવન્તિ । અન્યાશ્ચ શતશો ગોપીભાવં પ્રાપ્તાસ્તાં લીલાં પ્રાપ્તા ભવન્તિ । યં યં ભાવં સંયોક્ષ્યમાણા ગોપી ભવેત્તં ભાવં દ્વારિ પ્રાપ્ય રાસલીલાકૃતે ઉજ્જહાર । અત્યન્તભાવલીલાયાં સંયોક્ષ્યમાણા ગોપી પુષ્કરિણ્યાં તાસામઙ્ગરાગેણ ગીપીચન્દનં તાસામેવોચ્છિષ્ટં બુભુજે । ભક્તાનાં તદેવ હિતકારિ ભવેત્ । તદઙ્ગરાગોદ્ભૂતતદાવિર્ભાવેન મહાલીલાયોગ્યતાં પ્રતિપેદિરે । પુનઃ સંશયં પપ્રચ્છુઃ । અહો દ્વારિકાયાં રાસઃ કસ્મિન્ સમયે કૃતઃ? તત્ર મહાલીલાયાઃ સ્થાનં કુત્રાસ્તિ? યત્ર રસિકાનન્દઃ પુરુષોત્તમઃ ક્રીડતિ । કેઽત્ર ભક્તાઃ? કેષાં સહાયેન મહાલીલાસ્થાનં પ્રકટિતં ? શૃણુત સખ્યઃ

। મહાનયં ગોપ્યો રસઃ । યે પ્રત્યયાપન્ના ભક્તાસ્તે તં રસમનુભવન્તિ વ્રજલીલાયામ્ । ત્રિવિધા ગોપ્યઃ સન્તિ । એકા વેદઋચઃ સન્તિ । એકે અગ્નિકુમારાઃ સન્તિ । એકે સંસિદ્ધાઃ શ્રીરાધિકયા સહ પ્રકટિતા ભવન્તિ । અષ્ટૌ યૂથાનિ સંસિદ્ધાનાં ભવન્તિ । તેષાં દ્વાદશ યૂથાનિ બ્રહ્મણઃ પુત્રાઃ અગ્નિકુમારાઃ સન્તિ । દ્વાદશ યૂથાનિ વેદસ્ત્રીણાં સન્તિ । તે સાધનસિદ્ધાઃ યે ભક્તાઃ શ્રીરાધિકયા સહ રસિકાનન્દોપાસકા ભવન્તિ । યાઃ સંસિદ્ધાસ્તાસાં નિત્યલીલાયામનુભવઃ । યે અગ્નિકુમારાસ્તે વ્રજલીલાયાં શ્રીરાધિકયા સહ રસિકાનન્દમુપાસમાનાસ્તાં લીલાં પ્રાપ્તા ભવન્તિ । યા વેદરૂપિણ્યસ્તાસાં વિરહભાવેન મહાનનુગ્રહઃ કૃત । પ્રથમં મહાલીલાયાઃ પ્રાપ્તિઃ પશ્ચાદ્વિરહઃ । તા વિરહોત્કણ્ઠિતા ગોપ્યો નાન્યસુખં વિદુઃ । તાસામર્થે પઞ્ચયોજનપર્યન્તં મહાલીલાયાઃ સ્થાનં પ્રકટીકૃતમ્ । તાસાં મનોભાવબુભુત્સયા એકં સ્વગણં રહસ્યલીલાયોગ્યં પ્રેષયામાસ । દ્વારિકાલીલાયાં મહાલીલા પ્રકટિતા । સ એવ ગણસ્તાસ્તત્રૈવ નયતિ । રસિકાનન્દસ્તાસાં સ્વલીલામાવિષ્કરોતિ । રુક્મિણ્યાદ્યાઃ પટ્ટરાજ્ઞ્યસ્તાં લીલાં શ્રુત્વા ઉત્કણ્ઠિતાઃ બભૂવુઃ । તાભિઃ પ્રાર્થિતો રસિકાનન્દો મહાલીલાં દર્શયામાસ । તદા રસિકાનન્દેનોક્તાસ્તાઃ પટ્ટરાજ્ઞ્યો ભવન્ત્યસ્તલ્લીલાયોગ્યા ન ભવન્તિ । ઇમાઃ લીલા લોકે વેદમર્યાદાતિરિક્તાઃ । રસમાર્ગોપાસકા ભક્તાઃ સ્ત્રિયસ્તાં લીલાં જાનન્તિ । વયં રાજપુત્યઃ કથં તસ્યાં લીલાયાં યોગ્યા ન ભવેમ । બહુશઃ પ્રાર્થિતો રસિકાનન્દસ્તથેત્યુક્ત્વા પુનરાહ । અહો રાજપુત્ર્યો ભવતીનાં યદિ મહાલીલાદર્શનાકાઙ્ક્ષા ભવતિ તર્હિ અહં નિશીથે આધિદૈવિકીં રાત્રિં પ્રકટયિષ્યામિ । તત્રાધિદૈવિકોઽયં ચન્દ્રસ્તત્રાધિદૈવિકા ભક્તાઃ લીલોપયોગ્યા ભવતિ । ભવત્યસ્તત્રૈવાયાન્તુ । ઇતિ કથિતાસ્તાઃ સર્વાઃ વિસ્મયાપન્ના બભૂમુઃ । અહો અત્યન્તમાશ્ચર્યોઽયં વિલાસઃ । તત્રાગતા સુયોગા સખી રાસલીલાયાં યોગં ચકાર । સખી તત્ર રાસલીલાં રચયતિ । તત્ર રસિકાનન્દઃ પુરુષોત્તમોઽતિમનોહરરૂપેણ તાસાં મનાંસિ જહ્રે । તાઃ સર્વા ગોપ્યઃ ભ્રીરાધિકાયાઃ કૃપાવશેન રમયાઞ્ચક્રુઃ । તત્ર રસિકાનન્દેન બ્રહ્મરાત્રિઃ પ્રકટિતા । તસ્યાં રાત્રૌ તાઃ સર્વા મનોરથશતૈ રમયાઞ્ચક્રઃ । ક્રીડાન્તે બ્રહ્મરાત્રિરપાવૃત્તા બભૂવ । દ્વારિકાયાં સ્થિતા રાજપુત્ર્યઃ દ્વારે સ્થિતાન્ ગુરૂનુગ્રસેનવસુદેવાદ્યાન્ દદૃશુઃ । રસિકાનન્દેન મોહિતાસ્તત્ર સ્થિતા ગુરવો દદૃશુઃ । તાસાં તા રાત્રયો રાસલીલાયા ધ્યાનેન વ્યતીતાઃ । બ્રહ્મરાત્રિરપાપાવૃત્તેતિ પ્રાતસ્તાઃ સર્વાસ્તત્રૈવ સમાગતાઃ । તત્ર તત્સ્થાનં દદૃશુઃ । યત્ર મણિલતા મુક્તાલતા સુવર્ણલતાઃ પુષ્પૈઃ પત્રૈઃ ફલૈઃ સમ્પૂર્ણા મણિસ્તમ્ભૈર્ગ્રથિતા નિકુઞ્જતાં પ્રાપ્નુવન્તિ । સિદ્ધયો મૂર્તિમત્યઃ તત્રૈવ સ્થિતા દદૃશિરે । કામદેવો રત્યા સહ તત્રૈવ દદૃશે । તત્ર સ્થિતાઃ ગોપ્યો રસિકાનન્દેન સંયુક્તાસ્તાસાં રાજપુત્રીણાં લીલાં દૃષ્ટ્વા નિર્ગલિતમાના બભૂવુઃ । તાઃ પ્રશ્રયાવનતા રસિકાનન્દં પપ્રચ્છુઃ । અહો રાસલીલામસ્માકં દર્શય । તાથિઃ પ્રાર્થિતો રસિકાનન્દઃ પ્રોવાચ । સમયોઽયં વ્યતીતઃ । બ્રહ્મરાત્રિસ્તુ ગતા । મયા ભવતીનાં પૂર્વ કથિતમસ્તિ । ભવત્યો રાસલીલાયાં યોગ્યા ન ભવન્તિ । યે વેદોક્તકર્મમાર્ગરતાસ્તે કદાચિદિમાં લીલાં ન જાનન્તિ । તસ્માત્ ભવત્ય ઇમા લીલાયોગ્યા ન ભવન્તિ । બ્રહ્મલોકે સ્થિતા રુદ્રલોકે સ્થિતા ઇન્દ્રલોકે સ્થિતા નાગલોકે સ્થિતાઃ સ્ત્રિયસ્તા અપીમાં લીલાં ન જાનન્તિ । અન્યે મમ ભક્તાઃ બહવઃ સન્તિ । તેઽપીમાં લીલાં ન જાનન્તિ । તસ્માત્ ભવત્યો નિર્ગલિતમાના જાતાઃ । તેન ભાવેનૈતાસાં દર્શનં ન પ્રાપ્તાઃ । તાઃ રાજપુત્ર્યો રુક્મિણ્યાદ્યા રસિકાનન્દેનોક્તા દૃષ્ટ્વા પ્રસન્ના બભૂવુઃ । તાસાં નામાનિ પપ્રચ્છુઃ । સુયોગજા સખી તાસાં ગોપીનાં નામાનિ કથયામાસ । ઇયં ચન્દ્રાવલી નામ્ના તથા ચન્દ્રકલા વિખ્યાતા । ચન્દ્રાનના રોહિણી મનોરમા માધવી પુણ્યગન્ધા સુરતકલાવતી ભોગવતી હંસગમના ગુણવતી ગાનવતી સુરતકલાકોવિદા સુવિહારવતી નૃત્યકલાભિજ્ઞા એતા સખ્યઃ સ્વયુથૈસ્તન્મણ્ડલં સેવમાના ભવન્તિ । તાઃ પટ્ટરાજ્ઞસ્તાઃ સમ્પૂજયામાસુઃ । નાનાસુગન્ધાઙ્ગરાગેણ

વસ્ત્રાલઙ્કારભૂષણૈસ્તાસાં શૃઙ્ગારમકુર્વન્ । તાસામુચ્છિષ્ટજલેન પઙ્કાઙ્ગરાગેણ ગોપીપુષ્કરિણીતિ વિખ્યાતા બભૂવ । યસ્યામુત્પન્ના મૃત્તિકા અતિપવિત્રા ભવતિ । તા ગોપ્યસ્તદ્ભાવેન મહાલીલાયાં લયં પ્રાપ્તા બભૂવુઃ । સા લક્ષ્મીઃ પ્રશ્રયાવનતા નારાયણં પપ્રચ્છ । તેઽગ્નિકુમારાઃ ઋષયઃ કુતઃ સમુત્પન્નાઃ? તૈરિદં સ્થાનં કથં પ્રાપ્તમ્? કેન સાધનેન તે સિદ્ધા ભવન્તિ? સ હોવાચ । પૂર્વં બ્રહ્મા લોકપિતામહઃ સનકાદિના પૃષ્ટઃ । મહાલીલાયાઃ સ્થાનં કથય । યત્ર રસિકાનન્દઃ શ્રીરાધિકયા સહ નિત્યં ક્રીડતિ । તત્પ્રશ્નેનાતુરો બ્રહ્મા ધ્યાનાપન્નો બભૂવ । સ સમાધૌ મહાલીલાં દદર્શ । તદ્દર્શનેન વિકલેન્દ્રિયો બભૂવ । તત ઇન્દ્રિયેભ્યો રેતઃ આપદ્યત । તતો રેતઃ અગ્નૌ ન્યપતત્ । ગાર્હપત્યકુણ્ડે નિપતિતં રેતઃ પુરુષાયિતં બભૂવ । તતઃ સમુત્પન્નાઃ પુરુષા અગ્નિકુમરા ભવન્તિ । તતસ્તે ઋષયો ગોવર્ધનાદ્રૌ શિરસિ તપ આતન્વન્ । તદ્દિનમારભ્યૈતે તુ ઋષયો વ્રજં સેવમાના બભૂબુઃ । એકદા તે ઋષયો ગોવર્ધનાદ્રૌ શિરસ્યૈકાં કન્યાં દદૃશુઃ । શ્રીરાધિકયાનુગૃહીતાં સર્વાઙ્ગમનોહરાં તત્રાપ્સરઃપુષ્કરિણ્યાં મજ્જમાના તાં દૃષ્ટ્વા તે પ્રશ્રયેણ નમ્રા બભૂવુઃ ।

સા કન્યા તાન્ પ્રત્યુવાચ । ભો ઋષયઃ કુતઃ સમાયાતાઃ? કિં કુરુત?

ઋષયઃ ઊચુઃ । વયં બ્રહ્મણઃ પુત્રા અસ્મિન્ વને નિવસન્તો મહાવનવિહારલીલાદર્શનકાઙ્ક્ષિણો ભવામઃ । પુનસ્તેઽગ્નિકુમારા ઋષયઃ ઊચુઃ । ભો ભવતી કુતઃ સમાયાતા કિં કાર્યં કુરુતે? ઇદં રહસ્યમ્ । યદિ મનસિ કૃપાવિષ્ટા તર્હિ રહસ્યં કથય । સાધવો દીનવત્સલા એવાસતે । તયા દેવ્યા અનુગૃહીતાનાં તેષામતિકૃપાશાલી સ્વભાવોઽયમાપદ્યતે ।

સા પુનરુવાચેદં સ્વયમેવ કરુણયા । અહો અહમપિ પૂર્વં મહારુદ્રરાજ્ઞઃ પુત્રી આસમ્ । તસ્ય ગૃહે નિરન્તરમત ઇતઃ ક્રીડમાના ગીતગાનૈર્હરેર્લીલા મનસ્યાસાદિતાસ્મિ । તસ્ય ગુરુવિભાણ્ડકમુનિપુત્રી રૂપશાલિની નામ્ના સા નિરન્તરં તસ્યાં લીલાયાં સદા ધ્યાનાનુભાવના તયા દેવ્યાનુગૃહીતા લીલોપયોગ્યેતિ । તદા શ્રાવિતાનામધુનાતનીં લીલાં સોપરિષ્ટામભ્યેતિ । તે ઊચુઃ । કો મન્ત્રઃ? ક ઉપદેશઃ? કિં ધ્યાનં તસ્યાઃ? ઉપવિશ । યદિ કરુણાવતી વદ । શૃણુતેદં રહસ્યમ્ । ન કદાચિદ્વચનીયોઽયં રસઃ સર્વ એવ । ધર્માધર્મવિરક્તા યે ભક્તાસ્તેષામપ્યવચનીયઃ । રસરહસ્યવિદ્યામુપાસમાનઃ સદ્યોદર્શનમાપદ્યતે । અં ક્લીં ક્લીં રાધે સંમોહિનિ કામદાત્રિ કામકેલિકલારૂપિણિ નમો નમસ્તે । ઇદં રહસ્યં સર્વેષામપિ દુર્લભતરમ્ । આનન્દરસિકશિરોમણિમોહનેન રૂપેણ સદ્યોલક્ષં જપિત્વા ધ્યાનાપન્નો ભવેત્ । સંશૃણુયાત્તાં સા નવકિશોરી તપ્તહાટકાભરણા કેશચ્છટાચિક્કણસુગન્ધરસપ્લાવિતસીમન્તસિન્દૂરસેચિતમણિઘટિતસુવર્ણભૂષણૈર્ભૂષિતા રત્નકર્ણભૂષણજ્વલિતકુણ્ડલાભ્યામન્યૈઃ શુટ્યાદ્યૈર્ભૂષણૈઃ સંયોજિતા કેસરમૃગમદકર્પૂરચન્દનનાનારેખાસંયોજિતલલાટા મણિહીરકજાત્યતિલકયોજિતા સંશોભતે । કામકાર્મુકભ્રૂલતાસંમોહિતરસિકાનન્દા તદ્ઘ્રાણમૂર્ચ્છિતેયં સદા તદાવેશયોગ્યતાં પ્રપદ્ય ધ્યાયમાના ભવતિ । તાં પ્રપદ્ય સ વિશ્વજયી ભવેત્ । નેત્રકૃપાકટાક્ષૈર્ભક્તાનામભયદાયિની ભવતિ । ખઞ્જનમીનચાઞ્ચલ્યવશીકૃતો રસિકાનન્દો ભવેત્ । નાસાચઞ્ચુરતિતરાં તેજસા રાજતે । કપોલૌ સુવર્ણસમ્પુટૌ તેજોમયૌ ભાતઃ । શોભતે નાસા આભરણરચિતા । મણિમયમુક્તાફલૈર્ગુમ્ભિતો ભવતિ બિમ્બાધરો વિદ્રુમકાન્તિઃ । દ્વિજાલી તારાકારા ભવતિ । સા તેજસા ભાતિતરામ્ । જ્યોત્સ્નારાજમાનાનનોત્કણ્ઠગ્રીવા રાજન્તેઽતિતરાં કપોલકણ્ડાદયઃ । તિરસ્કુર્વન્તિ તસ્યા બાહુશોભાં કેયૂરકટકાનિ મરકતગુમ્ભિતાનિ વલયાનિ

શતશઃ તેજોમયાનિ । અતિતરાં લઘુ તારાકાન્તિ તિલકં શોભામત્યેતિ । રાજમાનૌ હસ્તૌ કરતલાભ્યાં યાવકરસવિભાવિતાઙ્ગુલીભ્યાં સૂક્ષ્મતરમણિઘટિકાભ્યાં ભવેતામ્ । સુવર્ણભૂષણાનિ સંરાજમાનાનિ સુરોચન્તે । તસ્યા વક્ષોજાવતિમૃગમદાગુરુરચિતાવેવ પુરુષોત્તમરસિકાનન્દરમણાધિષ્ઠાનં સંરાજમાનાવેવ ભવતઃ । મુક્તાગુમ્ફિતહારવલ્લીદ્વયૌ ચ ગિરી ઇવ સંરાજમાનૌ ભવતઃ । ગમ્ભીરનાભિહ્રદસન્નિધાને નવરોમરાજીયા શોભા હાટકોપઘટિતનીલમણિરાજિરિવ રાજતે । કટિમેખલા ક્ષુદ્રઘણ્ટિકારાજમાના મણિઘટિતહાટકખચિતતારાજાલશોભામભ્યેતિ । સંરાજમાનજઘનસ્થલવાસિમોહનગૃહં સૌભાગ્યાઢ્યં શબરવૈરિણોઽધિષ્ઠાનં રસિકાનન્દૈકકલસુરતમમલામ્બરૈઃ પરિવેષ્ટિતં સુવર્ણતારગુમ્ફિતં શોભાયમાનં રાજતે । કદલીકાણ્ડરુચિરાવૂરૂ શોભામભીતઃ ૅહરણકમલમઞ્જરીશોભા રાજમાના યાવકરઙ્ગરઞ્જિતેવ શોભામભ્યેતિ । નખચન્દ્રતેજસા રાજમાનોઽયં લોકો વિરાજમભ્યેતિ । અતઃ પરં શ્ૃણુત સખાયઃ ।રસિકાનન્દસ્ય રૂપં સદા નિકુઞ્જદેવ્યા ધ્યેયમ્ । આનન્દમાત્રોઽયં કરપાદે તેજોમયોઽમૃતમયઃ । શ્યામહિરણ્યપરિમધ્યવનમાલયા યુતો બર્હાપીડો નટનાટ્યયુક્તો મઞ્ચો રોચમાનો રાજમાનઃ શોભાયમાનઃ શોભયા સંરાજતે અતિતરામ્ । એક એવ પુરુષોઽયં સ્ત્રીષુ રમણાનન્દીયતિ । રસઃ સંરાજમાનત્વમભ્યેતિ । સંશોભાયમાનો ભવેત્ । એક એવ રસો દ્વિધા ભિન્નોઽયં શ્રીરાધાકૃષ્ણરૂપાભ્યામ્ । નિત્યાનન્દાય નમો નમઃ । તસ્માત્ રસસંયોગે ભક્તાસ્તસ્મિન્ રસે સમ્પ્રીયમાણમનસઃ સખિસ્થાને શોભાયમાનમભ્યેત્ય સઙ્ગચ્છન્તે । કોટિસૂર્યપ્રતીકાશં કોટિચન્દ્રપ્રભં સંરાજમાનં તેજોમયં બ્રહ્મેતિ પુરાવિદો વદન્તિ । યસ્માત્ સૃષ્ટિરુત્પદ્યમાનાભ્યેતિ । સંરોચમાનાદ્યસ્માત્ સમુત્પન્નસૃષ્ટયો બ્રહ્મવિષ્ણુરુદ્રાદયો યસ્ય પ્રતાપશક્ત્યોત્પન્ના નાનાસૃષ્ટિં કુર્વન્તિ । યસ્ય પ્રતાપશક્ત્યોત્પત્તિસ્થિતિલયાનાતન્વન્તિ । યસ્માત્ પ્રેમાનન્દામિત્યાનન્દોઽયં લોકઃ પ્રકટિતો ભવતિ । પ્રેમાનન્દ એવ સૃષ્ટિસ્ત્વાધિદૈવિકી । તસ્માત્ પ્રેમાનન્દરક્તપુરુષોત્તમાધિષ્ઠાનસૌષ્ઠવં યત્ર કોટિશો નિકુઞ્જનાનાલતાગ્રન્થિસ્તાસુ ગન્ધવૃક્ષાદિઃ રાજમાનત્વમભ્યેતિ । યત્ર નિકુઞ્જશ્રેણિપુ સખીનાં યૂથાન્યતિતરાં ક્રીડાશ્ૃઙ્ગારયોગ્યાન્યુપકરણાનિ રાજમાનાન્યભ્યેત્ય શોભાયમાનાનિ રાજન્તે । સ્થાને સ્થાને પૃથક્ પ્રક્રિયમાણાનિ શ્ૃઙ્ગારસ્થાનાનિ । હાટકમણિમય્યો ભૂમયઃ । નાનારઙ્ગમયફલપુષ્પવૃક્ષાદિરાજમાનામભિયન્તિ ષડૃતવઃ । યત્રાધિદૈવિકરૂપેણ વિરાજમાના નાનાતન્વન્ । તેષામેવ યાદૃશા ભક્તાસ્તાદૃશલીલાદૃષ્ટિમામદ્યમાનં શ્ૃણુત । સખિપ્રેમ્ણાઽયં લોકઃ સૃષ્ટોઽસ્માભિઃ પિતૃગૃહં ત્યક્ત્વા અસ્મિન્ વને પર્વતે નાનારમણસ્થાનમસ્માકમનુભવં પ્રતિપદ્ય રચિતં આધિદૈવિકં સ્થાનં વૃન્દાવનં અતિપુષ્ટપુષ્કરિણિ યત્ર નિકુઞ્જદેવ્યા સહ પુરુષોત્તમો રમણાનન્દો નિત્યક્રીડામાતનોત્ । સઙ્કેતસ્થાનં રમણાનન્દયુતો રસિકાનન્દઃ ક્રીડતે । રમણાનન્દઃ સ્વરૂપસ્વામિન્યાવેશઃ । રસિકાનન્દસ્તુ પુરુષાવેશઃ । ઇમાં લીલાવિદ્યામધીયતે યે તેઽનેન વ્રજસઙ્ગિનઃ સઙ્ગેન સઙ્ગચ્છ ન્તે । તસ્માત્ તસ્યા લીલાયાઃ કથા મદ્ભક્તૈઃ સહ ભક્ત્યા લીલાકથાયાં મગ્નાઃ રાત્રૌ યત્ર યત્ર પુરુષાસક્તા આત્માનન્દં તદરૂપિણં કુર્વાણા ભવેયુઃ । રુચિરાં લીલાં યોજ્યમાનાં તાં પ્રતિપદ્યમાના હિ તયા સ્તુત્યા ધ્યાનેન તલ્લીલાનુભવેન તન્નન્ત્રોપાસનેન તાં લીલાં પશ્યન્તસ્ત ઋષયસ્તદ્ભાવેન ગોવર્ધનાદ્રિશિરસિ અટન્તઃ આત્માનં તદ્ભાવેન ભાવયન્તોઽભવન્ । રતિરસભાવેનાનન્દયોગ્યતાં વૃક્ષલતૌષધયોઽનેકશોઽતિતરામાપદ્યન્ત । શ્રીરાધાપુષ્કરિણ્યાં તં મન્ત્રં જેપુઃ । તદ્ધ્યાનં ચક્રુઃ । તદ્રૂપે ગુણાત્મકે એકરસે પ્રત્યપદ્યન્ત । અતિતરાં ગાઢપ્રેમરૂપમાપદ્યન્ત । અતીન્દ્રિયજ્ઞાનેન સંયોક્ષ્યમાણા આપદ્યન્ત । રતિપ્રસઙ્ગેન તયા નિકુઞ્જદેવ્યા સ્વલોકદર્શનમનુભાવિતા અભૂવન્ । સા અત્યન્તગાઢપ્રેમ્ણા

તલ્લોકસેવનાત્ સ્વોચ્છિષ્ટં ભુઞ્જાનાન્ તાન્ પ્રતિ તદ્ભાવાભવત્ । વૃન્દાવનેરહસ્યક્રીડાયાં મહારાસસ્થલં દર્શયામાસ । તદ્દર્શનેન યોગ્યતાં પ્રાપ્તા અત્યન્તસ્તવનં ચક્રુઃ । તે અગ્નિનમઃ । નમ આનન્દરસદાયિને ।

પ્રેમાનન્દાય રતિદાયકસુરતાનન્દાય કુમારા ઊચુઃ । શ્રીરસિકાનન્દાય નમઃ । નમસ્તુભ્યમ્ । રસિકાનન્દાય નમો નમઃ ।
અવ્યાકૃતવિહારિણ્યૈ સર્વવ્યાકૃતિહેતવે ।
નમઃ કલ્યાણનિધયે નમસ્તુભ્યં નમો નમઃ ॥

નમોઽનન્તભોગવર્ધિન્યૈ ભોગાત્મિકાયૈ ભોગસાક્ષિણ્યૈ । નમઃ શ‍ૃઙ્ગારરૂપાય । નમો ભોગરૂપાભ્યામ્ ।
શરદિ ક્રીડતે તુભ્યં નમ આનન્દશાલિને ।
નમોઽનન્તવિહારાય નમસ્તે રસરૂપિણે ॥

નમો રસસાક્ષિણે । નમો ગૂઢકેલિકલાય । નમો દાનશીલાય । નમો વૃન્દારણ્યવિહારિણે । તદનુરૂપેણ તદા સાક્ષિણે નમોઽણુરૂપાય । નમો ધર્માય । નમઃ સર્વધર્માતિરિક્તાય । નમઃ કામદેવકુઞ્જરાય નમો નમઃ । સઙ્કેતવિહારિણે નમઃ । દાનલીલાસુખદાયિને નમઃ । ભોગસુખરૂપાય નમઃ । અત્યન્તસુખદેહિને નમઃ । સર્વધર્માતિરિક્તાય નમઃ । અનન્તસુખસમ્ભવાય નમઃ । શ્રીરાધિકાવલ્લભાય નમઃ । શ્રીરાધાધરસુધાશાલિને નમઃ । ક્લીં કામવને કુઞ્જકેલિરસિકાભ્યાં નમઃ । વ્રાં વ્રીં વૃન્દાવને રહસિ સંવલિતનિત્યાનન્દરૂપાભ્યાં નમઃ । નમઃ હ્રીં સૃષ્ટિસમુત્પન્નાભ્યામ્ । નમઃ હ્રાં સર્વચૈતન્યભોગશ્રાવકાભ્યામ્ । યુવાભ્યાં નમો રમણસુખવલ્લભાભ્યામ્ । ૐ શ્રીવૃન્દાવનસદામોદદાયિભ્યાં નમઃ । ૐ નમો વૃન્દાવને સખીસમૂહે પરસ્પરક્રીડાસંવલિતદેહાભ્યામ્ । ૐ નમઃ પરસ્પરશ‍ૃઙ્ગારસુખભોગવદ્ભ્યામ્ । ૐ નમ આધનાદિસમ્ભોગસુખભોક્તૃભોગાભ્યામ્ । ૐ નમો વૃષભાનુનન્દગૃહે ક્રીડાર્થં સમ્પ્રકટિતદેહસઙ્ગ્યાભ્યામ્ । ૐ નમો લલિતાદિસંસ્તુત્યદેહાભ્યામ્ । ૐ નમો યમુનાકેલિરસિકાભ્યામ્ । ૐ નમો જલકેલિરસિકાભ્યામ્ । ૐ નમો નૌકારસકલ્લોલાભ્યામ્ । એવ પરા કાષ્ઠા । તલ્લીલાકથા પરા કાષ્ઠા । તસ્યાં લીલાયાં પ્રત્યયઃ પરા કાષ્ઠા । અન્યકથાધર્મદાનવ્રતતીર્થસાધનાનિ વિમુક્તાનિ । યમનિયમપ્રાણાયામપ્રત્યાહારકલાસુખભાવિતા સામાન્યભક્તિરપિ ત્યક્તા । તલ્લીલોપાસકાનાં એકૈવ વ્રજલીલાતાયત । રતૌ રમણાનન્દે રતિરાસાં ભવતિ । અવસ્થિતોઽયં રસઃ । શુષ્કવાદિનામન્યાં લીલાં ન શ‍ૃણુયાત્ । કર્મવેદજનિતાનિ કર્મોપાસનાનિ યે કુર્વન્તિ તે કર્મજડા આસુરાસ્તોગં હઠાત્સઙ્ગસ્ત્યજ્યતે । ચિત્તવૃત્તિં દુષ્યતિ । યેષાં સઙ્ગં નાલપેન્ન શ‍ૃણુયાત્ તે ધર્મવિરોધિનસ્તાં લીલાં ન જાનન્તિ । તસ્માત્તદ્ધર્મદૃઢકારિણો યે તે સેવ્યાઃ પૂજ્યાઃ । તે તાં લીલાં દદતિ । અનન્યધર્માન્ શ‍ૃણુયાદિતિ રસમાર્ગિણાં ધર્મઃ । અરસિકા જીવાઃ કર્મજડા યે તેષાં સ્વેષ્ટં ન દર્શયેત્ । સ્વેષ્ટસ્ય વાર્તામપિ ન શ્રાવયેત્ । સખાયો યેષાં વિદ્યાવિર્ભાવસ્તેષામ્ । અન્યવિદ્યારુચિર્ન ભવત્યેવ । યદનન્યધર્મે રુચિરાસ્તેઽરુચિરન્યત્ર ભવેત્ । તસ્ય સ્વેષ્ટે આવિર્ભવતિ રતિઃ । સોઽન્યદિષ્ટં વિસ્મરતિ । ગુરુકૃપયા જીવત્વં પ્રપન્નાનામનુગ્રહત અનુગ્રાહ્યાનુગ્રાહકભાવેન રતિરાવિર્ભવતિ । અતિરતેઃ સ્નેહં વિના ન પ્રાપ્તિઃ સ્યાત્ । નારાયણં પ્રતિ લક્ષ્મ્યા આવિર્ભૂતયા તયા નિકુઞ્જદેવ્યા યાનિ સુખાન્યનુભૂયન્તે તેષાં પ્રશ્નં પુનરભિવદતિ । યે સાધનસિદ્ધાસ્તેષાં કુતઃ સ્થિતિઃ । કયા સરણ્યા તલ્લોકપ્રાપ્તિઃ સ્વરતિરાસ્તે । કયા રસિકાનન્દેન તસ્યા નિકુઞ્જદેવ્યાઃ પ્રાપ્તિર્ભવેત્ । યે ગવાં ગણાસ્તેઽતિતરાં તસ્યા દેવ્યાઃ

દૃષ્ટિગોચરા એવાસતામ્ । પુરુષો રસિકાનન્દઃ સ્વહસ્તેન તેષાં યથાસુખં પરિમાર્જયન્ દધિદુગ્ધનવનીતાદ્યાન્ રસાન્ સ્વયમેવ ભુઙ્ક્તે । યે વત્સતરાસ્તેષાં સ્વહસ્તેન પૃષ્ઠભાગાન્ પરિમાર્જયતિ । તેષાં સ્થાનં કિયત્પ્રમાણમ્ । નન્દાદયો ગોપા વૃષભાન્વાદયશ્ચ તે ગોપાઃ સાધનસિદ્ધા વા સંસિદ્ધા વા । યશોદાદ્યાઃ સ્ત્રિયો માતૃભાવં પ્રાપ્તાસ્તા અનાદિસંસિદ્ધા વા સાધનસંસિદ્ધા વા । યાસાં ગૃહે રસિકાનન્દોઽયં પૂર્વં તયા શ્રીરાધયા સ્વયમેવ સંસિદ્ધાસુ ભાવપ્રકટિતઃ એવ ભવતિ । અત્યન્તસ્નેહાવભવતામ્ । અત્યન્ત ઉત્સવો રમણ એવ ભવતિ ભજનપ્રેમાનન્દસુખપ્રાપ્તૌ । અતિતરાં રૂપાસક્તિર્ન કથં ભવેત્ । સુખરૂપરતિર્યેષામન્યત્કિં સ્મર્યતે । સ હોવાચ પૂર્વં સૃષ્ટ્યુત્પન્ના અષ્ટૌ વસવઃ । તેષાં વસુનામ્ના અષ્ટો કોટયો વસવો દેવપ્રવરા મમ લીલાલોકં શ્રુત્વા તલ્લોકે શ્રુતે ઉત્કણ્ઠમાના લીલયાપેદુરિતિ શ્રુતમ્ । ઇમં મહિમાનમભ્યેત્ય વનલીલાસક્તાઃ અતિતરામાસતામ્ । અતિલોલુપે ચિત્તે તસ્યાં વ્રજલીલાયાં રાધા આસ્ત । સંસિદ્ધનિકુઞ્જલીલાયાં મયોપવિષ્ટા મૌનેનાપન્નભાવા અભવન્ । ઓઙ્કારાવિર્ભાવલીલારૂપશ્રીરાધારસિકાનન્દરૂપં પ્રતિપદ્ય મનો ભાવાપન્નં કૃત્વા તાં લીલાં ગાયમાના અભવન્ । તે વસવ ઊચુઃ । ૐ શ્રીરાધારસિકાનન્દવિનોદાભ્યાં સંયુક્તાભ્યાં નમો નમઃ । નિત્યક્રીડાત્મને નમો નમઃ । કામકેલિકૌતુકાત્મને નમો નમઃ । કેલિકૌતુકાત્મને નમો નમઃ । શૃઙ્ગારરસવિનોદિને નમો નમઃ । ધાત્રે ક્રીડાસમ્પાદિને નમો નમઃ । અનન્તરસસમ્પાદકારિણે નમો નમઃ । સીમન્તિને નમો નમઃ । રતો સમ્ભોગિને નમો નમઃ । નાનાસુરતાનન્દનિધયે નમો નમઃ । રસિકાનન્દશિરોમણયે નમો નમઃ । રાસમાનજલક્રીડાત્મને નમો નમઃ । ક્રીડાવિનોદિને નમો નમઃ । રતિસમ્ભાવિતસુખસંવલિતાત્મને નમો નમઃ । સુરતોત્કણ્ઠિને નમો નમઃ । યૌવનાત્મને નમો નમઃ । રસસમ્ભોગાત્મને નમો નમઃ । અત્યન્તક્રીડાશ્રાન્તિસંવલિતવદનાય નમો નમઃ । પ્રથમસઙ્ગરઞ્જિતાત્મને નમો નમઃ । સમ્ભોગચટુચાટુવચનાય નમો નમઃ । મૃદુકપોલવાણ્યાત્મને નમો નમઃ । નિકુઞ્જે પુષ્પશય્યાશૃઙ્ગારવત્સખીસુખદાત્રે નમો નમઃ । આલિઙ્ગનચુમ્બનસુરતસુખસંવલિતવદનાય નમો નમઃ । સુરતાનન્દસમગ્રવશીકૃતરસિકાનન્દાય નમો નમઃ । આસનભેદસંયોગસુખદાત્રે નમો નમઃ । વિપરીતસુખદાય ઉદારચેતસે સમ્ભાવિતજિતરસિકશિરોમણયે નમો નમઃ । સુરતાનન્દવશીકૃતસ્વાધીનપતિકાશૃઙ્ગારાત્મસુખદાયિને નમો નમઃ । લલિતાયાં વિશાખાયાં કલાવત્યા શૃઙ્ગારવત્યાં યોજિતાત્મને નમો નમઃ । ભોગદ્રષ્ટે ભોગસમ્ભવાય નમો નમઃ । નિદ્રાસમ્ભાવિતવિપ્રલમ્ભસુખસમનુભવતિરસ્કૃતરસિકાનન્દાત્મને નમો નમઃ । અત્યન્તપ્રવીણરસસુખરસિકશિરોમણિભોગભાવ નમો નમઃ । સર્વક્રીડારસપૂરિણે નમો નમઃ । પૃથિવ્યાં યત્ર સુરતાનન્દભોગાસ્તદ્ભોગાવિર્ભાવાન્તર્યામિણે નમો નમઃ । પૃથિવ્યા યદાનન્દરૂપં તત્તદાનન્દદાયિને નમો નમઃ । પૃથિવ્યામતિકામમનોરથં સિદ્ધં વાસિદ્ધં સુન્દરં સુભગં તેષામેવ નમો નમઃ । એવં સ્તુતસ્તદા વસુભિઃ સ્વાનન્દાવિર્ભાવં દદાવતિપ્રીતો રુદ્રોઽયમ્ । વસૂનાં પ્રવરોઽયં નન્દોઽભવત્ । ધરાનામ્ની સ્ત્રી યશોદાસ્ત । બૃહદ્વસુશ્રેષ્ઠઃ કીર્તિદેવ્યા સહ વૃષભાનુરભવત્ । નિકુઞ્જદેવ્યા રસિકાનન્દેન સહ યત્રાનન્દોઽભવત્ । નન્દોપનન્દભદ્રાશ્ચકૃતવદુગ્રભઙ્ગોદધિસામન્તાતિરોચિષ્મત્કાત્યેયમત્યનઘરોચિષ્મદુષ્ણીષરશ્મિવસુસુજયા અન્યે ચ શતશો વસવ સાધનસિદ્ધાઃ એવાસત । તેષાં સ્ત્રીષુ શ્રીયશોદા સા ચ સત્યા આસ્ત । રસિકાનન્દશિરોમણિર્વૃન્દાવનેશ્વર્યા સહ સઙ્ક્રીડમાનોઽભવત્ । અતિરૂપલાવણ્યલવક સૂક્ષ્મસ્વરૂપેણૈનં ભજમાનાય નન્દરૂપં દત્તવાન્ । તે ગોપા ગોપ્યઃ । તે પરસ્પરમેકપ્રાણા એવાસત । તે ગોપા એકપ્રાણા એકરૂપિણ એકભાવા અભવન્ । યેષાં પુરુષોત્તમ આનન્દઃ । અન્યાશ્ચ ગોપ્યો નાનાભજનભાવમાવિષ્કૃત્ય

ભજનાનન્દે ભજનં કુર્વન્તિ । અતિતરાં સ્નેહોઽભવત્ ।

સા લક્ષ્મીર્નારાયણમુવાચેદમ્ । અત્યાનન્દોઽયં લોકઃ । યસ્મિન્ લોકે કેવલરસનિધિર્મોહનેન રૂપેણ ક્રીડામકરોત્ । સા વૃન્દાવનેશ્વરી કોટ્યાનન્દરૂપા યત્ર બાલકેલિક્રીડાં વ્યદધાત્ । તેષાં સ્થાનાનિ કીદૃગ્વિધાનિ । ગૃહાણિ કીદૃગ્વિધાનિ । વદ સર્વમાનન્દાવિર્ભાવેન । ભજનાનન્દઃ સુખં શ્રીરાધારસિકમોહનમેવં ક્રીડામાતનોત્ । સ હોવાચ લક્ષ્મીમ્ । નન્દસ્ય ગૃહં સર્વસમૃદ્ધ્યાનન્દાવધિ મણિમયમાધિદૈવિકેન રૂપેણ સ્વપ્રકાશમકરોત્ । પદ્મરાગમયઃ કુડ્યઃ । સુવર્ણજામ્બૂનદપ્રાકારા વીથયો વિરાજમાના ભવન્તિ । યત્ર વૃષભાનુગૃહં નન્દગૃહાદ્યોજનાયિતમ્ । તસ્માત્ સ્થાનાત્ દ્વાદશ શ્રેણયોઽતિતરાં લઘુકોમલમણય એવાસન્ । તાસુ શ્રેણિષ્વનેકશો લતાપ્રતાનિન્ય એવાસન્ । સુવર્ણયૂથિકાપ્રવાલૈર્મણીનારઙ્ગપ્રરોહૈરાનન્દક્રીડાસ્થાનમનુરચિતં ભવતિ । તત્રેદં સઙ્કેતસ્થાનમ્ । અહો લક્ષ્મિ કિં વર્ણ્યતે ચતુર્યોજનાયિતમ્ । નન્દવૃષભાનોર્ગૃહાત્ દ્વાદશ શ્રેણયો વિરાજમાના સઙ્કેતસ્થલાદુપરિતઃ । તેષુ સ્થાનેષુ મધ્યસ્થિતા અનેકશો વિવિધલતાપ્રાવારા અભિયન્તિ । મુક્તાલતાગ્રથિતા મણીનાં તેજસા પ્રદ્યોતિતા અભ્યેત્યતિતરામ્ । સહસ્રનિકુઞ્જા કદમ્બલતા સુગન્ધસંવલિતાતિતરાં વિસ્તીર્ણાભ્યેતિ સુભગા કદમ્બમઞ્જરી । હરિતપીતનીલશ્વેતશુભ્રાઃ કદમ્બાશ્ચ પરાગોદ્ધૃતપરિધયઃ સુવાસિતા આસન્ । તદ્ગન્ધલોલુપભ્રમરાઃ સંસિદ્ધાઃ સાધનસિદ્ધા અનેકશઃ કોમલકલં યશો ગાયમાના સન્તિ । કોકિલપિકશુકાઃ સંસિદ્ધાઃ સાધનસિદ્ધા અનેકકોમલકલં ગાયમાના સન્તિ । રૂપલાવણ્યયુતાઃ હંસમયૂરાદયોઽનેકશો રુચિરા ભવન્તિ । તે તસ્મિન્ સ્થાને રસિકાનન્દેઽતિમોહનરૂપે નિત્યં સઙ્ક્રીડમાના ભવન્તિ । વૃન્દાવનેશ્વરીનિત્યક્રીડાપ્રધાનં ભવતિ રાસસખીનાં સમૂહેન દશસહસ્રાણાં સમેતાનાં વૃષભાનોર્ગૃહમ્ । વૃષભાનુપુરં પૂર્ણાનન્દયુતં પ્રેમાનન્દયુતં સુખસન્તતિયુતમ્ । સર્વાઃ સમૃદ્ધયો દ્વારે તિષ્ઠન્તિ । અષ્ટમહાસિદ્ધયો દ્વારે દ્વારે તિષ્ઠન્તિ । અતિતરાં સુખસમ્પત્તિઃ સ્વરૂપેણ સુસેવતે । યે યે વિદ્યાસધર્માણઃ સુભગાઃ સુરતકલાકામનિદ્રાલજ્જાપ્રેમસુરતોત્કણ્ઠાદયસ્તે વિરાજમાના ભવન્તિ । અધિતત્સ્થાનં નિકુઞ્જે મધ્યે સુગન્ધશીતલા મણયો ગ્રીષ્માદિષુ ઋતુષુ સેવ્યરૂપાઃ ક્વચિત્ સુગન્ધપારિજાતાઃ કેચિદ્વૃક્ષાશ્ચમ્પકાઃ સદાપુષ્પિતાઃ સદા સુકોમલૈઃ પત્રૈર્વિરાજન્તે સુગન્ધાઃ । કેચિદ્વૃક્ષાઃ પક્વફલસુગન્ધરસયુક્તા વિરાજમાના આસતે । કેચિલ્લતાપ્રકીર્ણાઃ અતિતરાં સુગન્ધયુતાઃ । આમોદગન્ધલુબ્ધા ભ્રમરા મુદા ગાયન્તિ । કાશ્ચિદ્ગોપ્યસ્તત્ર મજ્જન્ત્ય આસતે । કાશ્ચિદ્ગોપ્યસ્તસ્યાં વસ્ત્રાલઙ્કરણૈર્ભૂષ્યાચક્રુઃ । કાશ્ચિદ્ગોપ્યઃ પ્રેમાસક્તા રાધારસિકાનન્દાભ્યાં ભોજનં ચક્રુઃ । કાશિદ્ગોપ્યો દોલાં તાભ્યાં સહ દોલયિત્વા ગાયમાના આસન્ । મુદા કાશ્ચિદ્ગોપ્યસ્તચ્ચિત્રશાલાયાં સ્વાનિ સ્વાનિ રૂપાણિ પશ્યન્તિ હૃષ્યન્તિ રાત્રૌ દિવાનવરતમ્ । ગોપ્યો ભાવાશ્રિતાસ્તદ્બાલલીલાં ગાયમાના ભજનં ચક્રુઃ । અપ્યાસક્તાઃ પ્રેમભજનરૂપા આનન્દં વિન્દન્તે । તતો ગોપાસ્તથા રસિકાનન્દે મગ્ના અત્યન્તપ્રેમભજનં કુર્વતે । યે પ્રેમભજને નિમગ્નાસ્તે તાં લીલામાપદ્યન્ત । નિત્યલીલાભજનાનન્દોઽયં રસોઽનિર્વચનીયઃ । નન્દયશોદાવૃષભાનુસત્યાદયો યે ભક્તાસ્તે ભજનાનન્દં નિત્યમનુભવન્ત્યતિતરામ્ । ભૂયો ભૂયઃ સુખસૌષ્ઠવમભવત્ । એવં ગોપા ગોપ્યસ્તન્મયતાં પ્રાપ્નુવન્તિ । તાસાં માતૃભાવં પ્રપન્ના ગોપ્યો ભજનાનન્દે ભજનમેવ કુર્વાણા આસન્ । તાસાં ગૃહા દિષ્ટ્યાનાદિસુખસમૃદ્ધિસમ્પત્તયો ભવન્ત્યાનન્દસુખસમૃદ્ધિસિદ્ધયઃ । નાનાભજનયોગ્યાન્યુપકરણાનિ તદર્થે સમ્પાદિતાનિ ભવન્તિ । ગોપગોપિકાદીનાં સમૃદ્ધિસુખં તસ્ય ભજનાર્થમેવ ભવતિ । અતિતરાં સુખાર્થમેવ યોગ્યતાપદ્યતે । અનન્તસુખસમ્પત્તિતયા નિકુઞ્જદેવ્યાઃ સ્વાવેશેન સુખકોટ્યાનન્દં પ્રાપ્નુવન્તિ । અભિયન્તિ ચ

સુખસંયોગ્યતામ્ । પૃથિવ્યાં ભારતે ક્ષેત્રે આનન્દમયો લોકઃ સ્વસૃષ્ટિલીલાર્થે સ્વયમેવ પ્રકટિતઃ । તસ્મિન્ વ્રજલોકે સર્વા એવ લીલાઃ સન્તિ । યે ગોપા ગોપ્યસ્તે આધિદૈવિકીં લીલામતિતરાં સંસિદ્ધા અનુભવન્તિ ।

સા લક્ષ્મીરુવાચેદમ્ । રહસ્ય ઇહ વ્રજમણ્ડલે યાનિ પૃથક્સ્થાનાનિ તાનિ બ્રૂહિ । એકવિંશતિયોજના ભૂમિરાનન્દમય્યેવાસ્તિ । યમુનાયા દક્ષિણકૂલતો મહાસ્થાનં પઞ્ચયોજનાયતં વિહારસ્થાનમતિતરાં સૂક્ષ્મં નિત્યવિહારરહસ્યકેલિકલાવિર્ભાવભાવિતમ્ । તસ્મિન્ સ્થાને યે વૃક્ષાઃ ગૃહાણિ નિકુઞ્જા અન્યાનિ વિહારસ્થાનાનિ તાન્યાધિદૈવિકાન્યાસન્ । યો વંશીવટોઽયં સાક્ષાચ્છિવોઽયમ્ । યો ભણ્ડીરવટઃ સ એવ દેવેન્દ્ર આસીત્ । તત્ર સ્થિતા યે પક્ષિણસ્તે સાધનસિદ્ધા આસન્ । તે નિરન્તરં તાભ્યામાસન્ । યે તત્ર મનુષ્યા આધિદૈવિકરૂપા એવાસન્ તે વૃન્દાવનેશ્વરીસમનુગૃહીતાસ્મદા તાં લીલાં દર્શયન્તિ તદનુગ્રહતઃ । યાસામજ્ઞાત્વા જ્ઞાત્વા વા યસ્મિન્ કસ્મિન્ ભાવે ભાવો ભવેત્તા ભાવેન તાં લીલાં પ્રાપ્નુવન્તિ । યત્ર કુત્રાપિ સ્થિતોઽપિ તદ્વૃન્દાવનોદ્ભવા મૃત્તિકાં ભક્ષયેત્ । સ તવ તાં લીલાં પ્રાપ્નોતિ । તત્સ્થાનોદ્ભવાનાં વૃક્ષાણાં પુષ્પમાલાં યે કણ્ઠે ધારયન્તિ તે સર્વકૃત્યં વિધૂય તાં લીલાં પ્રાપ્નુવન્તિ । સદા તાં લીલાં ગાયમાનાસ્તાં લીલાં પ્રાપ્તા એવ સન્તિ । યૈઃ પ્રતિક્ષણં વૃન્દાવનં સ્મર્યતે ન કૃતાર્થતાં પ્રાપ્નુવન્ત્યતિતરામ્ । અસ્યામાધિદૈવિકી લીલાં પ્રાપ્તાસ્તાં લીલાં ગાયન્તિ ધ્યાયન્તિ । સ્નેહાસક્તા યે તસ્મિન્ સ્થલે નિવસન્તિ તૈ પૂર્વં તત્સૃષ્ટ્યુત્પન્ના એવ સન્તિ નાન્યત્ર । તસ્મિન્ વૃન્દાવને ગોવર્ધનોઽયં પર્વતઃ પઞ્ચયોજનાયતઃ । ત્રીણિ યોજનાન્યચ્છિદ્રિતસપ્તશૃઙ્ગાણિ નિરસ્તધાતુમયાનિ । યત્ર નિરન્તરં શ્રીરાધારસિકઃ પુરુષોત્તમઃ સઙ્ક્રીડતે । યસ્ય ગહ્વરાણિ સુકોમલાનિ સુગન્ધજુષ્ટાનિ વિરાજમાનાનિ ભવન્તિ । યસ્મિન્ ગોવર્ધને સ્વયમેવ શ્રીરાધારસિકશિરોમણિઃ ક્રીડાં કરોતિ । અતિતરામાનન્દમયોઽયં પર્વતો યસ્મિન્ પર્વતે રુદ્રો રુદ્રાણ્યા સહ પૂર્વ સૃષ્ટ્યાદૌ તપ આતનોત્ । યેન તપસા શિવઃ શિવોઽભૂત્ તત્ર રુદ્રશિવપુષ્કરિણ્યાં યે મજ્જનં કુર્વન્તિ તે તાં લીલાં પ્રાપ્નુવન્તિ । યે તં પર્વતમુપસેવમાના ભવેયુસ્તેષામનેનૈવ શરીરેણ લીલાયોગ્યતાસ્તિ । અનેનૈવ ગોવર્ધનાદ્રૌ કામદુઘા યા તપ આતનોત્ સેયં ગોવિન્દપુષ્કરિણી । યે પ્રેમમગ્નાસ્તસ્યાં પુષ્કરિણ્યાં મજ્જન્તિ સેવન્તે તે તાં કાલે કાલે તસ્યાઃ દર્શનયોગ્યતામતિપ્રેમાનન્દપ્રાપ્તિમનુભવન્તિ । યત્ર માનસસરોવરં વિધાય મયાપિ તપ આતન્યત । તત્તલ્લોકેછયા અપ્સરસા ઉર્વશ્યા તસ્મિન્ ગોવર્ધનાદ્રૌ તપ આતન્યત । સાનુભવોઽયં લોકો યત્ર યત્ર પરિતઃ શિલાઃ શ્રીરાધાકૃપ્ણનામાઞ્ચિતાસ્તત્ર તાઃ શિલાઃ શ્રીવૃન્દાવનેશ્વર્યધિવસતિ । આનન્દમયેન સહ યે ભક્તાસ્તસ્ય પરિક્રમં કુર્વન્તિ તે તલ્લીલાદર્શનયોગ્યતાં પ્રાપ્નુવન્તિ । ઇન્દ્રપરાજયમહોત્સવે અહમપિ બ્રહ્માદિના સહ તસ્મિન્ સ્થાને દર્શનાર્થં ગમિષ્યામિ । અતિતરાં શ્રીરાધારસિકસ્ય ક્રીડાસ્થાનં ભવતિ ।

સા લક્ષ્મીઃ પુનરુવાચેદમ્ । રહસ્યસ્થાનેઽસ્મિન્ પર્વતે રુદ્રેણ કસ્મિન્ કાલે તપઃ આતન્યત । તલ્લીલાં વિસ્તરશો બ્રૂહિ । મમ મનોઽતિલોલં તસ્યાં કથાયામ્ । સુખે કસ્તૃપ્તિં યાતિ । યેન તપસા ધ્યાનેન તદ્ભાવો ભવેદતિતરામ્ । અહો અહં તં લોકં શ્રોતુકામા । વિસ્તરેણ બ્રૂહિ । એવં પ્રપન્નાં હૃદ્યાધાય સ્વયમેવ નારાયણ અભિવદત્યતિતરામાનન્દમયેન ચેતસા । સ હોવાચ । શૃણુ લક્ષ્મિ અસ્ય લોકસ્ય હન્ત માહાત્મ્યમ્ । અહં વક્તુમશક્તશ્ચ । યસ્ય શ્રીરાધિકા રસિકાનન્દસ્ય વિહારસ્થસ્ય દર્શનાલાપકથાનુભવ અતિતરાં સદ્યઃ સરૂપે રમણાનન્દે સ્નેહાધિક્યં પ્રાપયન્તિ । તથૈવ તે ધન્યાસ્તે કૃતાર્થાઃ । તે અન્યધર્મરહિતત્વેન પ્રેમાનન્દે પ્રીતિમાપદ્યન્તે । અતિતરામાસક્તિર્ભવેત્ । બ્રાહ્મણઃ ક્ષત્રિયો વૈશ્યઃ શૂદ્રો વા અન્યે જાત્યન્તરજાઃ શતશો જાત્યન્તરભેદાસ્તે

પ્રાપ્નુવન્તિ । ન વર્ણેન ન ધર્મેણ યેષાં લીલારતિરાસ્તે તે તાં લીલાં પ્રાપ્નુવન્તિ । અન્યભાવેનેશ્વરાવિષ્ટચિત્તા અન્યદેવ પ્રાપ્નુવન્તિ । તદ્ભાવે ન કદાચિત્તમેવ પ્રાપ્નુવન્તિ । યેષાં તલ્લીલાનુભવો ન સ્યાત્ તેષામનેકશઃ સાધનાનિ વૃથા સ્યુઃ । બ્રહ્મવિદ્યાસેવિનો જ્ઞાનિન આત્મવેદનેન તાં લીલાં ન પ્રાપ્નુવન્તિ । તસ્માત્તલ્લીલાદર્શનયોગ્યા ભક્તાઃ સ્વભાવેન તસ્યા શ્રીરાધિકાયા અનુગ્રહાત્સ્વાત્મભાવા ભવન્તિ । શિષ્ટાનુશિષ્ટસ્વેષ્ટધ્યાનકથાસેવાનુભાવેન તેષામનુભવકથાયામાસક્તિઃ સ્યાત્ । સા સંયોક્ષ્યમાણા રતિરિન્દ્રિયાર્થે । રતિસઙ્ગો ભાવાપન્નો ભવતિ । યે રતિકલનયાનુગૃહ્યન્તે તૈ તાં લીલાં પ્રાપ્તવન્તો ભવન્તિ । સર્વં ત્યક્ત્વા તલ્લીલાયા અનુભવિનો ભવન્તિ । અનુભવસમ્ભવસ્તદા ભવેત્ યદા સાધવઃ કૃપાં કુર્વન્તિ રતિર્ભવતિ ચ ।

સા લક્ષ્મીઃ પુનરુવાચેદમ્ । ત્વયોક્તં યૈષા વ્રજવાસિની સૃષ્ટિરદ્ભુતં સ્થાન પ્રાપ્તૈવેતિ યસ્મિન્ સ્થાને ગોવર્ધનોઽયં રાજમાન આસ્તે । તસ્મિન ગોવર્ધને રુદ્રેણ તપો રુદ્રાણ્યા સહાક્રિયત । પુષ્કરિણીં વિધાય તપ આતનોત । યથાયં લોકો રુદ્રેણ તપતા દૃષ્ટઃ સ્તુતઃ કથિતો હૃદિ ધ્યાત તવાયં લોકઃ સર્વેષાં ભક્તાનાં સન્દૃશ્યતે । સુશોભનોઽયં લોકઃ સર્વેષાં લોકમહાલીલયા આવેશેન તેષાં ભક્તાનામનુગ્રહં પ્રપદ્યમાનો ભવેત્ । કથં રુદ્રેણ દર્શનં પ્રાપ્તં કેન સાધનેન શિવઃ સિદ્ધોઽભવત્ ? સ એવં ગૌવર્ધનાદ્રો કિયત્કાલં કિંરૂપં તપોઽતપ્યત? દૃષ્ટવિભવોઽયમ્ । વિસ્તરશો બ્રૂહિ યદિ કૃપાભાવો ભવેત્ । સ હોવાચ । પૂર્વં સૃષ્ટ્યાદૌવકસ્મિન્ સમયે શિવઃ શિવયા વૈકુણ્ઠે તલ્લીલાદર્શનાર્થં ગતવાન્ । તત્ર નાનાસત્ત્વમયાનિ સઙ્ક્રીડમાનાન્યનેકશો રુદ્રેણ દૃષ્ટાનિ । સર્વા મયા ક્રીડિતા ક્રીડા દૃષ્ટ્વા અનુભૂય અતૃપ્તેન્દ્રિયોઽભવત્ । મમાગ્રે સ્થિતા રુદ્રો મમ ધ્યાનાવસ્થાં દૃષ્ટ્વા અત્યાશ્ચર્યવાન્ અહો સાક્ષાન્નારાયણોઽયં પરં બ્રહ્મ । રુદ્રાદયો યં ધ્યાયન્તિ । રુદ્રાદયો યાં વેકુણ્ઠાશ્રિતાં લીલામભિલષન્તિ । આદિત્યાદયો યં દ્યોતયન્તિ । યસ્ય કલાવતારાન્ પૃથિવ્યાં દેવા ઋષય સ્તુવન્તિ । યં નારાયણં ધ્યાયન્તી તેન રમા સદા ક્રીડતે । યં ગત્વા ચતુર્ધા મુક્તયો દ્વારે તિષ્ઠન્તિ । તદ્ધામ સર્વેષાં દેવાદીનામપિ દુર્લભતરમ્ । સ એવ નારાયણઃ કસ્ય ભજનં કુરુતે । અત્યાશ્ચર્યં ગતો રુદ્રો બદ્ધાઞ્જલિઃ સન્ નારાયણં સ્તૌતિ । સ હોવાચ રુદ્રઃ । નમોઽનન્તાય મહતે વૈકુણ્ઠાય શ્રીમતે તેજોમયાય તુભ્યં નિત્યં નમો નમઃ । તવાંશકલા યા નૃસિંહાદ્યાઃ રામાદ્યા અનેકશો લીલામયાસ્તા ધ્યાયમાનોઽહં શિવતાં પ્રાપ્તઃ । અહમધુનાત્યાશ્ચર્યે ગતવાનસ્મિ । અહં નિરન્તરં તવ ધ્યાનેન વિચરામિ પૃથિવ્યામ્ । ત્વં કં ધ્યાયસિ? સર્વં વર્ણય તવ કૃપા યદિ સ્યાત્ । ઇતિ શિવેન સમ્પ્રાર્થિતોઽહં તલ્લોકસ્થિતિ કથયિષ્યન્- શ◌ૃણુ તાત અહં નિત્યં તલ્લોકં ધ્યાયામિ । યત્ર નિકુઞ્જેશ્વર્યા ક્રીડતે, રસિકાનન્દો વનવિહારે । યદ્રહસિ ક્રીડાસ્થાનમ્ । યત્ર નન્દમયકામકેલિકૌતુકરતિરાસવિનોદકુઞ્જાશ્ચ શતશો વિરાજન્તે । યત્ર ગોવર્ધનોઽયં ગિરિઃ રાજમાનો ભવતિ । યત્ર કદમ્બકુઞ્જશ્રેણયો ગહ્વરાણિ રત્નાનિ ધાતુમયાનિ । યત્ર પુષ્કરિણ્યોઽમૃતોદૈઃ પૂર્ણા વિરાજન્તે । યત્ર મણિગણાકરા જ્યોત્સ્નાતિતેજોરૂપસંવલિતપરસ્પરવસ્તુપ્રતિબિમ્બિતા આસતે । તસ્ય લોકસ્ય દૈવતં શ્રીરાધિકયા સહાનન્દરસિકં પુરુષં ધ્યાયેમ । યસ્ય કટાક્ષાત્ સમુત્પન્ના લોકાનાં બ્રહ્માણ્ડાનામુત્પત્તિસ્થિતિલયાન્ કુર્વન્તિ । અનેકશો વિદ્યા અવિદ્યા દેવાશ્ચાસુરાશ્ચાનેકશઃ સૃષ્ટિસ્થિતિલયાન્ લભન્તે । યત્ર બ્રહ્માણ્ડાનિ કોટિશો વિરાજમાનાનિ રાજન્તે । તદતિતરાં સુશોભાયમાનં બ્રહ્મેતિ પુરાવિદો વદન્તિ । યત્ર ગત્વા ધામ્નિ લયં યાન્તિ યોગીન્દ્રાઃ । શ◌ૃણુ યદિ તે તસ્ય લોકસ્ય દ્રષ્ટુમિચ્છા વર્તતે તર્હિ ત્વં વ્રજ । વ્રજમણ્ડલે ગોવર્ધનો ગિરિરાસ્તે । રત્નધાતુમયોઽયં પર્વતઃ । યત્ર રસિકાનન્દોવૃન્દાવનેશ્વર્યા સહ

ક્રીડમાનોઽભવત્ । પરિતઃ ક્રીડોપયુક્તાનિ વનાનિ દ્વાદશ શોભાયમાનલ્ઙ્કિ સુગન્ધલતૌષધિભિઃ સંલગ્નાનિ રાજન્તે । યમુનામૃતોદકૈઃ ક્રીડાવિહારસ્થલાનિ સમ્ભજન્તે । યત્ર યમુના બદ્ધોભયતટીવિરાજમાના ભવતિ । અતિતરાં પદ્મરાગપુષ્પરાગચન્દ્રકાન્તસૂર્યકાન્તમણીનાં તેજોભિર્વિરાજમાનાનિ જલાનિ શોભન્તે । યત્ર યમુનાયા ઉપરિ શતશો વાનીરકુઞ્જા વિરાજન્તે । જાતિયૂથિકામલ્લિકાસુવર્ણયૂથિકાપ્રકરસુગન્ધસંવલિતેઽસ્મિન્ પરાગધૃતોન્મદાઃ ભ્રમરપિકશુકસારસહંસશ્રેણયઃ શોભાયમાનાઃ કલકણ્ઠૈર્નિકુઞ્જદેવ્યા યશોઽતિતરાં ગાયમાના ભવન્તિ ।યત્ર વૃન્દાવનલીલાયા નિકુઞ્જદેવ્યાઃ રમણલીલાસ્થાનમ્ । યસ્ય સ્મરણાદેવ રસાવિષ્ટચિત્તો ભવેત્ । વૃન્દાવનં વૃન્દાવનં ઇતિ પ્રતિક્ષણં યે વદન્તિ તે દેહોપાધિં ત્યક્ત્વા તસ્ય લીલારતિમનુભવન્તિ । તન્મમાપિ નિરન્તરં બ્રહ્માદીનામપ્યદૃષ્ટગોચરમ્ । સહસ્રયોજનાત્ યે વૃન્દાવનં સંસ્મરન્તિ વૃન્દાવનમિતિ પ્રતિક્ષણં વદન્તિ તે તલ્લીલોપયોગ્યા એવ ભવન્તિ । યત્ર કુત્રાપિ મૃતો વૃન્દાવનોપાસકસ્તત્સ્થલં તીર્થરૂપં ભવેત્ । યે વૃન્દાવનોદ્ભવાસ્તુલસીકાષ્ઠાઙ્કિતમાલાઃ કણ્ઠે ધારયન્તિ તે કૃતાર્થતાં પ્રાપ્નુવન્તિ । તસ્યાં લતાઃ સરસા આસતે । અતિતરાં પ્રીતિઃ ભવતિ । યે વૃન્દાવને વૃક્ષાસ્તે આધિભૌતિકાઃ સિદ્ધાઃ । સાધનસિદ્ધા ઇતસ્તતો ભ્રમન્તીર્લતા ઓષધિક્રીડાસ્થલાનિ કુર્વન્તિ । તયા દેવ્યા વૃન્દાવનેશ્વર્યા ત્રયઃ કોટયઃ પુલિન્દગણા ઉત્પાદિતાઃ । તેષાં વૃન્દાવનવાસિનાં દેહોચ્છિષ્ટાનિ મલમૂત્રાદીનિ દેહોદ્ભવાનિ કફલાલામૂત્રાણિ તે પુલિન્દગણા ઊષરે ઉત્ક્ષિપન્તિ । તેષાં ભક્તાનાં દિવ્યદેહ આધિદૈવિક ત્વાસ્તે । અતિતરાં સૌભાગ્યાઙ્ગે ભવતિ । અહો શિવ વૃન્દાવનમાહાત્મ્યં કેન વર્ણ્યતે ? સેવકા યત્ર કુત્રાપિ યત્કિઞ્ચિત્ ભોગાર્થે કુર્વન્તિ તદ્ભોગો રસિકાનન્દેન સહ નિકુઞ્જદેવ્યા સર્વઃ સમ્ભોક્ષ્યતે । અતિતરાં સુખસમ્ભોગસ્થાનં તત્ સ્થાનં મમાપિ ધ્યેયં ભવતિ । અહં નિરન્તરં ધ્યાનાપન્નો ભવામિ । તસ્મિન્ વૃન્દાવને મધ્યસ્થાનં નિરન્તરં મમ ધ્યેયમ્ । તસ્ય સ્થાનસ્ય ધ્યાનેનાહમાનન્દસ્થાનમાનન્દાવેશેન ભવામિ । આનન્દધ્યાનાદહં તત્ પ્રતિપદ્યે । અહો શિવ ત્વમપ્યાનન્દસ્થાનમતિતરાં પ્રતિયોજ્ય તદભ્યેહિ । ધ્યાનાપન્નો ભવ । રતિરસભાવભેદધ્યાનાપન્નો ભવ । તદ્વૃન્દાવનેશ્વરીરૂપમઙ્ગપ્રત્યઙ્ગં રસિકાનન્દેન સહ યો ધ્યાયતિ સ એવ ક્રીડાયાં મનોભાવાપન્નો ભવતિ ।

પુનઃ શિવ ઉવાચ । ત્વયોક્તાનિ દ્વાદશવનાનિ । તેષુ વનેષુ પૃથક્ પૃથક્ વદ સર્વમ્ । સ હોવાચ । શૃણુ શિવ વર્ણનં વનાનાં યાનિ કૃત્વા વ્રજલીલાયામત્યન્તસુખિનઃ સમ્ભવન્તિ । મહાવને નન્દસ્યાધિષ્ઠાનમ્ । ગોકુલે ગવામધિષ્ઠાનમ્ । યમુનાયાં ક્રીડાધિષ્ઠાનમ્ । વૃન્દાવને સ્વામિન્યા લીલાધિષ્ઠાનમ્ । કામવને મહાલીલાસઙ્કેતસ્યાધિષ્ઠાનમ્ । બૃહદ્વને વૃષભાનુપુરનન્દપુરાધિષ્ઠાનમ્ । લોહવને પુલિન્દસ્યાધિષ્ઠાનમ્ । તાલવને ઉપનન્દાદ્યધિષ્ઠાનમ્ । દધિગ્રામે દધ્યધિષ્ઠાનમ્ । ગોવર્ધનાદ્રિપૃષ્ઠે દધિવિક્રયાધિષ્ઠાનમ્ । ગોવર્ધનાદ્યધો દાનશ્રેણિદાનલીલાધિષ્ઠાનમ્ । અયં ગોવર્ધનાદ્રિઃ રમણલીલાધિષ્ઠાનં ભવતિ ।

અરિષ્ટે ગોગણે કુબ્જવટે વૃન્દાવને તથા ।
ગોવર્ધનગિરૌ રમ્યે સૃષ્ટિઃ સર્વાત્મના ભવેત્ ॥

ભોઃ શિવ અસ્મિન્ સ્થાને શ્રીરાધારસિકાનન્દાવેવ રૂપેણ સદા રમણં કુરુતો લીલાસમેતૌ । અત્યદ્ભુતા સંસિદ્ધા લીલા સદા ગોવર્ધનાદ્રૌ । આનન્દમયે સ્થાને તપ આચર । સ રુદ્રો રુદ્રાણ્યા સહ તત્ર પુષ્કરિણીં વિધાય તન્નારાયણમુખાત્ શ્રુતં લોકસ્ય ધ્યાનમકરોત્ । કિઞ્ચિદ્ધ્યાનેન ધ્યાનાપન્નોઽભવત્ । દશસહસ્રવર્ષ

તલ્લોકદર્શનાર્થં તપ આચરત । તદ્ધ્યાનેન નિકુઞ્જદેવ્યા દૃષ્ટિપથમતિમોહનેન રૂપેણાનન્દદર્શનમાપેદે । ધનવિદ્યુદુપમરૂપનવીનયા જાયયા સહ કેલિસમ્પત્તિસમવેતં રમણાનન્દં ક્રીડાસમેતમરૂપયત્ । તદ્રૂપદર્શનેન સમાકુલોઽયં શિવસ્ત્રિભિર્નેત્રૈર્નિરૂપયન્ પુનઃપુનઃ પઞ્ચભિર્વક્ત્રૈઃ સ્તુતિમાપેદે । ઉવાચાયં શિવઃ । અં અં અનન્તાય નમો નમઃ । શ્રીં શ્રીં શ્રીકૃષ્ણાય તુભ્યં નમો નમઃ । સં સં સમ્ભોગપ્રિયાય નમો નમઃ । બૃં બૃં વૃન્દાવનવિહારિણે નમો નમઃ । કું કું કુઞ્જવિહારિણે નમો નમઃ । લં લં લલિતાવિહારિણે નમો નમઃ । ક્રીં ક્રીં ક્રીડાવનવિહારિણે નમો નમઃ । રાં રાં રાધામનોહારિણે નમો નમઃ । કિઞ્ચ નિરન્તરરાસક્રીડાસક્તાય નમો નમઃ । સદામનોહારિણે નમો નમઃ । સદા રતિપ્રિયાય નમો નમઃ । સદા ગાનપ્રિયાય નમો નમઃ । સુરતાનન્દાય નમો નમઃ । આલિઙ્ગનપ્રિયાય નમો નમઃ । કૂટસ્થાય નમો નમઃ । રમણાનન્દસુખદાત્રે નમો નમઃ । અતિભોગપ્રિયાય નમો નમઃ । અન્તરાત્મને નમો નમઃ । અતિરતિવિહારિણે નમો નમઃ । અત્યદ્ભુતચારિત્રાય નમો નમઃ । ભારદ્વાજરૂપિણે નમો નમઃ । રામાય નમો નમઃ । મોક્ષદાય નમો નમઃ । ભક્તારદપ્રદાય નમો નમઃ । સકલકલાકોવિદાય નમો નમઃ । લીલાવિહારિણે નમો નમઃ । નમઃ । ભક્તપ્રિયાય નમો નમઃ । અત્યાનન્દદાયકાય નમો નમઃ । મહાક્રીડાસુરવદાય નમો નમઃ । મહાકસ્તૂરીતિલકાઙ્કિતાય નમો નમઃ । શ઼ૃઙ્ગારવત્યાદીના સખીનાં સુખદાયકાય નમો નમઃ । મોક્ષદાય નમો નમઃ । સ્વચ્છન્દોપાત્તદેહાય નમો નમઃ । શોકમોહભયવૈરાગ્યદુરવનાશહેતવે નમોનમઃ । અન્તર્યામિણં નમો નમઃ । રસિકાનન્દાય નમો નમઃ । પરસ્પરરાસકેલિકલાકૌતુકાય નમો નમઃ । વિપ્રલમ્ભસુખપ્રદાય નમો નમઃ । અતિરતિકૌતુકાય નમો નમઃ । અગણિતાનન્દદાયિને નમો નમઃ । એવં સ્તુત્વા તદા રુદ્રસ્તૂષ્ણીં કેવલેન્દ્રિયસ્તદ્ભાવભાવિતોઽપ્યાસીત્ । સરતિરાસીત્ । ગતવ્યથઃ આસીત્ । સમચેતા આસીત્ । સ્તુત્વા રસિકાનન્દેઽભવત્ । તયા વૃન્દાવનેશ્વર્યા સ્તુત્યા પ્રસન્નયા વરેણ છન્દિતઃ સાભિપ્રાયેણ સ્તવેન સ્તવિતા ત્વં વરં પ્રાર્થયેતિ । અકામો વા સકામો વા મદ્ભક્તો યજમાનોઽયમ્ । વરેણ તાં પ્રતિ છન્દયિત્વા શિશ્રાય । અહો મયિ યદિ તુષ્યસિ તર્હિ વ્રજલોકે ક્રીડાસ્થાનં દર્શય । અયં દેયો વરો મમાભિલષિતઃ । વરોઽસૌ તવ ભવેત્ । તયા નિકુઞ્જદેવ્યા દત્તો વરોઽયં તે દિવ્યં ચક્ષુર્દત્તવત્યસ્મિ । ત્વં ચક્ષુષાઽનેન મમ વિહારસ્થલં દર્શયિષ્યસિ । તસ્મિન્ ગોવર્ધનાદ્રૌ રુદ્રસ્ય સર્વા વ્રજલીલા દૃષ્ટિપથે આવિર(ર્?)ભૂવન્ । પ્રથમં નન્દસ્ય ભવનં કોટિવૈકુણ્ઠવ્યાપિરત્નકુડ્યૈર્વરમણિસ્તમ્ભૈઃ શોભિતમપ્યાસીત્ । અતિતરાં નન્દગૃહં પઞ્ચવિંશતિયોજનાયતં પઞ્ચયોજનભૂમૌ મણિસ્તમ્ભાકુલં બાલક્રીડાયાં રમણયોગ્યં યત્ર પુરુષોત્તમો રસિકાનન્દઃ સંસિદ્ધલીલાં કરોતિ । સા વ્રજેશ્વરી સ્વયમેવ દેવરૂપં વિધાય તસ્મિન્ રસિકાનન્દે ક્રીડાં કરોતિ । યથા પુરુષોત્તમસ્ય રસિકાનન્દસ્ય સંસિદ્ધપ્રકટાનુભાવસ્તથા સંસિદ્ધોઽયં નન્દવસુભિઃ સ્વાવેશપ્રકટાનુભાવો વિતન્યતે । નન્દગૃહાદ્વૃષભાનોર્ગૃહં યોજનાયિતમ્ । રઙ્ગવત્યાદયઃ સખ્યઃ પ્રેમવપ્યાદયશ્ચ યશોદાયાઃ સમીપે ક્રીડોપકરણાન્યકુર્વન્ । ઉપનન્દસ્ય પુત્રી વિશાખા નામ્ના રસિકાનન્દસ્ય ભાવાભિજ્ઞૈવાસ્તે । નન્દસ્ય વૃષભાનોર્ગૃહાત્ શ્રીરસિકશિરોમણિદ્વાદશશ્રેણયઃ એવાસતે । રમણસ્થાનં પઞ્ચયોજનવિસ્તીર્ણમેવાસ્તે । અતિરતિરમણકોટિકામપૂર્ણ જામ્બૂનદસુવર્ણખચિતસુકોમલમાસ્તે । રમણસરસાઃ શતશઃ સુગન્ધપારિજાતકા ઇવ મણયો લલામભૂતપરસ્પરગન્ધાઢ્યા ભવન્તિ । કલ્પદ્રુમવૃક્ષાઃ વાઞ્છિતફલદાતારો ભવન્તિ । અતિતરાં ફલપુષ્પમણિલતાહરિતપીતશ્વેતશુભ્રભ્રમરસંવલિતયોજિતાનિ રતિકલાભાવસ્થાનાનિ સંરાજન્તે યમલૈર્યમલૈઃ કુઞ્જવિદ્રુમલતાગ્રથિતાનિ । અતિરસરમણાનન્દયોગ્યાનિ શય્યોપકરણાનિ સંયોક્ષ્યમાણાનિ ભવન્તિ । શાખાસક્તાઃ પક્ષિણો વિરાજમાના નાનારઙ્ગૈશ્ચઞ્ચુપક્ષૈર્ભવન્તિ । તે પક્ષિણઃ કલશબ્દં સમવેતા યશો

ગાયમાના ભવન્તિ । તેષુ પક્ષિષુ કેચિત્ સાધનસિદ્ધાઃ સંસિદ્ધાશ્ચ ભવન્તિ । અતિપ્રવ્રજિતાઃ પરસ્પરગોષ્ઠીયુક્તા આસતેઽતિતરામ્ । મણિજ્યોત્સ્નાપાકૃતાન્ધકારૈરતિતરાં રાત્રૌ દિવા તેજસા વ્યક્તાન્યાસત । તસ્મિન્ સ્થાને રઙ્ગવતી પ્રેમવતી રસિકાનન્દેન સહ ક્રીડતઃ । વૃષભાનુકુમારી લલિતા વિશાખા અનુરાધા ચન્દ્રકલા સુમુખી સુભગા ભોગવતી સુગન્ધાઙ્ગી રતિમતી કામપૂરા કામદા કામાક્ષી કલાવતી હરિણાક્ષી હંસગમના શૃઙ્ગારવતી દૃષ્ટિમોહના જિતકામા વશકામા કામવર્ધિની સર્વાઙ્ગકામા કામદૃષ્ટિઃ કામકલાકોવિદા રતિદાત્રી રતિસુખસમ્પત્પ્રદા સલજ્જા નિઃશઙ્કા નિર્લજ્જા અતિરતિભોક્ત્રી શ્રાન્તા સોત્સાહા સુરતાગમજ્ઞા વનસ્થાનજ્ઞા સઙ્કેતજ્ઞા લતાવૃક્ષજ્ઞા નિકુઞ્જશ્રેણિપુ માર્ગજ્ઞા લતાપરીક્ષાકોવિદા મણિપરીક્ષાકોવિદા અતિસન્ધિજ્ઞા સઙ્કેતરસજ્ઞા કેકાભિજ્ઞા પક્ષિણાં ભાષાભિજ્ઞા પક્ષિસમ્બન્ધાભિજ્ઞા સઙ્કેતસ્થાનજ્ઞા સમ્ભાવિતરસજ્ઞા શય્યોપાતા ખાદ્યપેયચોષ્યલેહ્યરસાસ્વાદજ્ઞા નાનાસુગન્ધરસભેદજ્ઞા વસ્ત્રસુગન્ધભેદજ્ઞા ભૂષણજ્ઞા અઙ્ગયોગ્યભેદાભિજ્ઞા શૃઙ્ગારયથાયોગ્યકાલાભિજ્ઞા તાલાભિજ્ઞા ગીતજ્ઞા ગતિરસભેદજ્ઞા તન્તુત્પાદ્યરાગભેદજ્ઞા સુગન્ધજ્ઞા અઙ્ગરસભેદગુણજ્ઞા સુગન્ધનૃત્યભેદજ્ઞા સમ્પત્તિસુખજ્ઞા સદારાસકીડાપ્રકટગુણગાનકોવિદા રાસાગમસોત્સાહા રાસલીલા વચનસુખદાયિની ગતાઃ સખ્યો વિહારસ્થાને આસતે । કુઞ્જપ્રતિકુઞ્જસુખદાયિનીષુ સખીનાં કુઞ્જશ્રેણિષુ સુખસમ્પત્તિસુખાર્થં વિદ્રુમશ્રેણીયા નાનાકુઞ્જા અતિતરાં સંશોભન્તે । તાસુ શ્રેણિષુ પુષ્પપરાગોદ્ભૂતા યવનિકા સમ્ભવન્તિ । તત્સૃષ્ટિવેષ્ટિતેઽઙ્ગભૂષણૈર્ભૂષિતાનિ સ્થાનાનિ ભૂષયન્તિ । શોભાયમાનાનિ રચિતયોગ્યાન્યપ્યુન્નતશ્રેણિપુ વિયૂથાનિ વિરાજમાનાનિ ભવન્તિ । સખીનાં સમૂહાઃ શ્રેણિષુ સમ્ભોક્ષ્યમાણાઃ ક્રિયામારભન્તે । દ્વાદશશ્રેણિપુ શ્રીનન્દસ્ય શ્રીવૃષભાનોર્ગૃહાત્ પૃથગ્દ્વારાણિ રાજન્તે । તત્ર જામ્બનદસુવર્ણભૂમિમણિગણચિત્રિતમધ્યસ્થલં ક્રીડાવિહારસંયુક્તં મણ્ડલાકારં પઞ્ચયોજનાયતમ્ । યત્ર કામ આધિદૈવિકેન રૂપેણ ઉપસેવમાનો ભવતિ । શ્રેણીનાં દ્વારાણિ તસ્મિન્મણ્ડલે પૃથક્શોભાયમાનાનિ સન્તિ । એકા શ્રેણી મણિલતાસુગન્ધાઢ્યા સુકોમલાતિતરાં ન કોમલા ન કઠિના । અત્યદ્ભુતસુરચિતાયાં વૃન્દ સખી આસ્ત । તયાતિતરાં તસ્ય સેવાર્થે શ્રીરાધિકાયાશ્ચ રચિતા શય્યૈવાસ્તે । તત્ર તસ્મિન્ મણિલતાન્તરે ચતસ્રઃ શ્રેણયઃ શોભાયમાના ભવન્તિ । તાસુ શ્રેણિષુ ચતસ્રઃ પુષ્કરિણ્ય આસતે । એકા પુષ્કરિણ્યુષ્ણોદકેન પૂર્ણૈવાસ્તે । એકા પુષ્કરિણી સુગન્ધશીતજલૈવાસ્તે । એકા પુષ્કરિણ્યમૃતોદકેન પૂર્ણૈવસ્તિ । તત્ર મજ્જનસ્થાનમત્યન્તશોભાયમાનં ચતુઃસરં યત્ર મણીનાં દ્વાદશ શૃઙ્ગાણિ શોભાયમાનાનિ ભવન્તિ । એકસ્માદ્ગૃહાદન્તઃ સુગન્ધતૈલાગુરુરસકર્પૂરમૃગમદકેસરરસાઃ શતશઃ પુષ્પલતાપત્રત્વક્પયોભિઃ સુગન્ધિતેષુ રસેષુ સમ્પૂરિતા ભવન્તિ । મજ્જનક્રિયોપયોગ્યાઃ સખીનાં સમૂહાઃ મજ્જનં કારયન્તિ । નાનાજલકેલિસુખસમ્પત્તિર્મજ્જનાવતા તન્મજ્જનૈઽતિતરા સરતિરાસ્તે । જલસમ્પત્ત્યૈ અતિતરાં સુજલકલ્લોલા સખી ઉપમેવતે । તત્ર હંસીહંસાઃ સારસાઃ પક્ષિણોઽગ્રેઽગ્રે ક્રીડન્તિ । અતિતરાં જલકેલિકલ્લોલકર્મકરણાદનન્તરં તત્રાધિદૈવિકેન રૂપેણાગ્નિરત્યન્તસુખદાયકરૂપેણ સેવતે । અતિતરાં સૂક્ષ્મસ્વરૂપકિરણૈઃ સૂર્યરૂપ મેવમાન આસ્તે । અઙ્ગરાગસમ્પૂર્ણમઙ્ગરાગસ્થાનમ્ । મન્દિરમત્યમૃતમઙ્ગસુખદાયિ શોભાયમાનમભ્યેતિ । યત્ર ચન્દ્રકિરણા શોભાયમાના આસતે । સૂક્ષ્મતરતજસા સેવમાનાઃ આસતે । તત્ર રઙ્ગવત્યો નાનાઙ્ગરાગં પ્રકુર્વન્તિ । અતિસુખદાયિનોઽતિતરામઙ્ગરાગાઃ શોભાયમાનાઃ સુખભોગા આસતે । શોભનં તૃતીય શૃઙ્ગારગૃહમ્ । યત્ર ગૃહાત્ ગૃહન્તરાત્ દ્વારાણિ શોભાયમાનાનિ ભવન્તિ । તત્ર સખીનાં સઞ્ચાર આસ્તે । અતિરતિસઞ્ચરિતાઃ સખ્યઃ સુખદાયિન્યઃ શૃઙ્ગારમધિકુર્વન્તિ

। પ્રથમમગુરુવાસિતકબરીસુગોપ્યમાનાનિ મન્દારપારિજાતપુષ્પાણિ શોભાયમાનાન્યાતન્વન્ । તત્કાલં મણ્ડલેન ગુમ્ભિતકેશપાશઃ શોભતે । ક્ષુદ્રઘણ્ટિકાશબ્દસૂક્ષ્મતરસમ્ભાવિતા વૃન્દાવનેશ્વરી પ્રીયમાણા ભવતિ । સીમન્તો નાનામણિમુક્તાગ્રથિતજામ્બૂનદસુવર્ણખચિત એવૈતિ । મેઘોપરિ જ્યોત્સ્ના ઇવ નક્ષત્રગણા વિરાજન્તે । સ્યૂતપૂષ્પસુવર્ણજટિતમણિમુક્તાખચિતાન્તરજ્યોત્સ્નાભાવિતાઃ શોભાયમાના આસતે । કુટિલજટિતજ્યોસ્નાભિઃ અભ્રચ્છાયાકર્બુરિતચન્દ્ર ઇવાસ્તે । કર્ણકુણ્ડલજ્યોસ્નારુચિમણ્ડલં કુણ્ડલયુગલમ્ । લલાટં તિલકહાટકહીરકમણિજ્યોસ્નાભિરતિતરાં જટિતં સંરાજતે । મણિભ્રુવૌ વિજયકામકાર્મુકખણ્ડલતે ઇવ સવિરાજેતે । નેત્રે ચિતખઞ્જનમીનચાતુર્યં જિતવતી । નાસા કનકમુક્તાયોજિતા સંરાજતે નિતરામ્ । નાસાભરણનીલપીતરક્તમણિજ્યોસ્ના રાજમાના નાસામભ્યેતિ । અતિરતિબિમ્બાધરોષ્ઠૌ વિદ્રુમરઙ્ગરઞ્જિતાવાસ્તામ્ । હીરકાવલીઘટિતમુક્તાફલજ્યોત્સ્નાભિઃ રઞ્જિતમથ્યચિબુકં મુખમણ્ડલં સલાઞ્છનં ચન્દ્રમણ્ડલમિવાસ્તે । ઘટિતકોમલમુક્તાવલીકૌ કુચકુમ્ભૌ હાટકમણિજ્યોસ્નાભિઃ પુષ્પપરાગપરીતાવિવાસ્તામ્ । ભુજલતાકરકઙ્કણમરકતજ્યોત્સ્નાભિર્હસ્તાઙ્ગુલિમુદ્રિકાજટિતમણિતેજાંસિ રાજમાનાનિ સન્તિ । નાભિહ્રદકુહરે લોક ઇવ આશઙ્ક્યતે । કટિમેખલાક્ષુદ્રઘણ્ટિકાઃ કામદેવદુન્દુભિભૂષણાનિ ભવન્તિ । નાગેન્દ્રહસ્તા અતિતિરસ્કૃતા એવ ત્વચિ કર્કશત્વેન । કદલીસ્તમ્ભાઃ એકાન્તશૈત્યેન તદ્દુર્વારુપમાનબાહ્યા એવાસન્ । ચરણકમલૌ નૂપુરાભ્યાં શોભાયમાનાવાસ્તામ્ । આપદ્યમાના આસેદુષ્યો વિશદચરણાઙ્ગુલ્યઃ શોભાયમાનાઃ ભવન્તિ । ગતિરતિવિલાસવત્યાસ્તે । રઙ્ગવતી સખી વાનીરશ્રેણિનિકુઞ્જે રસિકાનન્દસ્ય શ‍ૃઙ્ગારં દર્શયન્ત્યાસ્તે । શ્યામહિરણ્યપરિધિવનમાલ્યબર્હાદ્યોતિતમુક્તાવલી શોભતે । ધાતુપ્રવાલનટવેષવિચિત્રિતાઙ્ગશોભાઢ્યા સન્નિકૃષ્યન્ત્યાસીત્ । મકરાકૃતિકુણ્ડલૌ શોભાયમાનમાનનમતનુતામ્ । કનકકપિશં વનમાલયા વિરાજતે વેણુવાદનકલરવકલાપકલિતં પીતામ્બરમ્ । તસ્મિન્ મધ્યસ્થાને ચતુર્ધા શ્રેણય વિદ્રુમલતાલવઙ્ગલતાગ્રથિતાઃ । વૃક્ષાગ્રગ્રથિતાભિઃ શ્રેણિસઞ્ચાર આસ્તે । તસ્યાં શ્રેણ્યાં મધ્યે એક શય્યામન્દિરં મણિકુઞ્જઘટિતં વિરાજતે । પુષ્પરાગમણિના ખચિતજ્યોત્સ્નાભિઃ સંવલિતા પ્રતિબિમ્બિતાઃ મણયોઽતિતરાં રાજમાના ભવન્તિ । રઙ્ગવતી પ્રેમવતી નન્દગૃહં સકલશ‍ૃઙ્ગારભૂષણૈર્ભૂષિતં રસિકાનન્દમતિપ્રેમ્ણા આનયતિ । અત્યન્તાનન્દમગ્નાન્યાનન્દરસેન વનાન્ત્યુત્ફુલ્લિતાનિ સંસિદ્ધાનિ કોટિશઃ । સખીનાં સમૂહાઃ કોટિશો ગીતાનિ ગાયન્તિ । તાસુ શ્રેણિષુ પરસ્પરસઞ્ચારાય સખીનાં માર્ગા આસતે । માર્ગે મણિદ્યોતિતાઃ પરિધયો રાજમાનાઃ શોભન્તે । એકા પઞ્ચમી શ્રેણી પુષ્પિતા નાનારઙ્ગરચિતા આસ્તે । પુષ્પાણિ ફલાનિ લતાયાં સન્તિ । અનેકમણિલતાપ્રવરજ્યોત્સ્નાપુષ્પલતા આરક્તા એવાસતે । પુષ્પિતવૃક્ષાણાં સુગન્ધમણિલતાનાં પરસ્પરજ્યોત્સ્નાસંવલિતવીથયો વિરાજન્તે । અમૃતફલફલિતા વૃક્ષા અતિતરાં પીતરક્તતરઙ્ગિતનાનાજ્યોત્સ્નાઃ પરસ્પરમતિતરાં શોભાયમાના ભવન્તિ । અતિસ્વાદૂનિ મધુરાણિ ફલાનિ નમ્રાણિ સન્તિ તેષામ્ । તેષામધઃ સૂક્ષ્માઃ પુષ્પલતા નાનારાગરઞ્જિતા એવાસતે । તાસાં લતાનામધઃ શય્યારચિતા રમણાનન્દસુખસમ્ભોગાયૈવાતિતરા સુગન્ધપુષ્પસિકતારચિતાઃ યોગ્યા નાનાસ્તરણૈઃ સંવલિતા કામરસપોષકા એવાસતે । તાસુ શ્રેણિષુ વિચિત્રશાલા અનેકશઃ સંરાજમાના ભવન્તિ । તાસુ શાલાસુ સૂક્ષ્માણિ સુગન્ધમણીનાં ગૃહાણિ સંરાજન્તે । તેષ્વન્તનાનાભક્ષ્યભોજ્યાનિ વસ્તૂન્યતિતરાં સૌષ્ઠવેન રાજમાનાનિ પ્રકાશન્તે । અન્યતો રચિતા શય્યા વિવિક્તા આસ્તે । યત્ર સા વૃષભાનુસુતા

સુરતાનન્દશ્ચ સમ્ભાષતે । તસ્મિન્ ક્રીડામણ્ડલે ષષ્ઠી શ્રેણી મણિપ્રેશ્વૈર્વિરાજમાના ભવતિતરામ્ । દ્વારં ત્વારક્તમણિખચિતયન્ત્રકવાટસ્થલહાટકજટિતમણિરાજિરાજમાનં ભવતિ । તત્ર ષડૃતવઃ સંલગ્નાઃ સેવન્તેઽતિતરામ્ । યત્ર ગ્રીષ્મોઽયં ઋતુઃ તત્ર શીતલજલાઃ પુષ્કરિણ્યસ્તટભૂમિરલકુટીચન્દ્રકાન્તમણિજલયન્ત્રાણીવાસીદન્તિ । યત્ર હંસીનાં યૂથાનિ ક્રીડાં કુર્વન્તિ । અન્યે પક્ષિણઃ દેવવાણ્યા પરસ્પરસુખમનુભવન્ત આસતે । ભોગતામ્બૂલાદ્યા અતિતરાં તસ્મિન્ સ્થાને આસતે । શ્રેણિસપ્તમદ્વારમતિતેજો મયમુત્તરા શતં મન્દિરાણિ એકાવલ્યા સન્તિ । દક્ષિણતઃ શતં મન્દિરાણ્યેકાવલ્યા રાજન્તે । યત્ર સખીનાં યૂથાનિ તેષાં સ્થાનાનિ  ક્રીડાવિહારસ્થલાનિ યોજ્યમાનાનિ સમ્ભવન્તિ । યત્ર લલિતા વિશાખા અન્યાશ્ચ શતશઃ સખ્યો રતિપ્રેમાનન્દસ્થાને રમણાનન્દયોગ્યા ભક્તાસ્તિષ્ઠન્તિ । યસ્યાં શ્રેણ્યાં ગૃહં ગૃહં પ્રતિ અષ્ટ સિદ્ધયો મૂર્તિમત્યઃ સંરાજમાના આસતે । અનેકશો ભૂષણૈર્ભૂષિતા અલં ગોપ્યસ્તેષુ ગૃહેષુ ક્રીડાં કુર્વન્તિ । નાનારસા નવનીતરસાઃ રાધાસ્વાદિતમિષ્ટરસા અનેકરસાસ્વાદસુખદાઃ સન્તિ । દુગ્ધફેનાનેકભોગાઃ સુખસમ્ભોગ્યા ભવન્તિ । તેષુ આસ્તરણયુક્તાઃ શય્યા શતશો રાજમાનાઃ ભવન્તિ । તેષુ સ્થાનેષુ સુરતાનન્દપ્રેમાનન્દમગ્ના સખ્યસ્તદુપકરણરસં સઙ્કુલયન્તે । અષ્ટમી શ્રેણિઃ આમ્રકદમ્બકદલીચમ્પકાશોકપુન્નાગરોધ્રમન્દારપારિજાતકલ્પકનીપનીરવટન્યગ્રોધોદુમ્બરજમ્બૂવૃક્ષસરલશિંશુપાખદિરવકુલપિપ્પલશ્લેષ્માતકબદરીતાલતાલીવનમધુરશાખાલવઙ્ગૈલાજાતીત્વવક્પૂગનાલિકેરમાતુલઙ્ગક્રમુકકણ્ટકિનોઽનેકશઃ વૃક્ષાઃ પુષ્પલતાગ્રથિતાઃ કેતક્યઃ અમૃતવલ્લ્યમૃતફલૈર્ગ્રથિતા અનેકપુષ્પગુચ્છલતાગ્રથિતા વલ્લયો વસન્તે વાસન્તીપલ્લવૈઃ યોગ્યાસ્તસ્મિન્ કદમ્બવને નિર્ભરસેચનરસસઙ્કુલિતા અનેકલતાગ્રથિતાઃ સુવર્ણાલવાલશ્રેણયો ગ્રથિતાઃ જલપુષ્કરિણ્ય ઇવાગાધજલપૂરિતા એવાસતે । પટ્ટડોરિગ્રથિતસુવર્ણઘટિકો જલપ્રવાહો જલયન્ત્રમુખાવિર્ભૂતો ભવતિ । તત્ર મધ્યે પુષ્કરિણ્યાં રત્નખચિતા મુક્તાખચિતા દ્વાર્જલયન્ત્રશીકરૈરાવિષ્ટા ભવતિ । નવમી શ્રેણિર્જલેન સિચ્યમાના અનેકજલક્રીડોપકરણા સંયોક્ષ્યમાણા ભવતિ । ક્વચિત્સૂર્યવંશીકમલાનિ ક્વચિત્સોમવંશીકમલાનિ વિરાજમાનાનિ । તસ્ય મધ્યસ્થલે વાનીરકુઞ્જે યમુના જલકલ્લોલવતી રત્નબદ્ધોભયતટી રાજમાના ભવતિ । યત્ર વૃક્ષશાખા જલસ્પર્શાદ્દોલાવિદ્રુમલતા ભવન્તિ તત્ર વૃન્દાવનેશ્વરી રસિકાનન્દેન સહ દોલાયામેતિ । લલિતાદ્યાઃ સખ્યઃ સઙ્ગાયન્ત્યો ભવન્તિ । તત્ર મયૂરકોકિલહંસસારસવિહગાદ્યાઃ સઙ્ગાયમાના ગુણગણનાયુતાઃ ભવન્તિતરામ્ । દશમી શ્રેણિઃ રસિકાનન્દસ્ય કન્દુકલીલાધિષ્ઠાનસ્થાનં પ્રતિ યોજનાયતં સુવર્ણભૂમિજટિતખચિતં પદ્મરાગમણિગણાવલિતં ભૂમિરચિતં રઙ્ગશ્રેણિવિરાજિતમતિતરાં શોભતે । અતિવિવિક્તે તસ્મિંસ્થાને કન્દુકલીલયા સુશોભમાનં સ્થાનમ્ । તાઃ સર્વાઃ સખ્યઃ કન્દુકલીલાયાં કન્દુકલીલાપરસ્પરસ્વમર્યાદા નાતિક્રામન્તિ । શ્યામા રસવતી લલિતા શ઼ૃઙ્ગારવતી રઙ્ગવતી કલાવતી ગુણવતી ગાનવતી કુઞ્જવતી સુશ્રોણી ચન્દ્રમુખી ચન્દ્રલેખા તાઃ સર્વાઃ સખ્યઃ કન્દુકકેલિયષ્ટિં ગૃહીત્વા સ્વમર્યાદાઃ નાતિક્રામનયઃ ક્રીડન્તિ । રસિકાનન્દશિરોમણિઃ સ્વયમેવ કન્દુકયષ્ટિં ગૃહીત્વા ક્રીડતિ । વિશાખા ચન્દ્રલેખાનૂરાધા અતિરતિજ્ઞા રમણાનન્દજ્ઞા સુરતોપદેશા સુરતકલાકોવિદા ગાનવતીત્યેતાઃ સર્વાઃ સખ્યઃ કન્દુકયષ્ટિં ગૃહીત્વા શ્રીરાધિકાયાઃ કન્દુકમર્યાદામનતિક્રમ્ય કન્દુકં નયન્તિ । એવં પરસ્પરં સ્વં સ્વં મર્યાદયા કન્દુકં નયન્તિ । યદા શ્રીરાધિકયા સહ રસિકાનન્દઃ કન્દુકવ્યાજેન ક્રીડામનુભવતિ તદા તાઃ સર્વાઃ સખ્યો જયશબ્દમુદીરયન્તિ । અન્યાઃ પુષ્પવત્યાદયઃ સખ્યઃ પુષ્પવૃષ્ટિં કુર્વન્તિ । તસ્મિન્ ક્રીડાસ્થાને એકં મન્દિરં પ્રેમવત્યા સુરચિતં સર્વભોગાઢ્યં મનોરમમસ્તિ । પ્રેમવતી પ્રણિપાતપુરસ્સરં શ્રીરાધિકયા સહ રસિકાનન્દં શ્રમાપનોદાર્થે નયતિ । તત્ર ભોગવતી

સર્વભોગાન્ ગૃહીત્વાઽગ્રતસ્તિષ્ઠતિ । તત્રાન્તઃ સુરચિતા સખી સુભગાં સર્વભોગાન્વિતાં શય્યાં રચયિત્વા પ્રશ્રયાવનતા શ્રીરાધિકયા સહ રસિકાનન્દં નયતિ । તત્ર મનસિ સોત્સાહં કરોતિ । તત્ર રહસિ ચતસ્રઃ સખ્યઃ સુસેવમાના ભવન્તિ । સુકામા અલજ્જા સુરતોદ્ગમા સુરતાનન્દા સેવમાના ભવન્તિ । અન્યા લલિતાદયઃ સખ્યસ્તત્સુખં નિરીક્ષ્યાતિરસમગ્નાસ્તાં લીલાં ગાયમાના ભવન્તિ । તદા લીલાન્તે ચતસ્રઃ સખ્યઃ સેવમાના ભવન્તિ । નિદ્રાલસા સંમીલિતા સુસુખા ગતત્રપા સુસેવમાના ભવન્તિ । તત્ર જાતાઃ સુલજ્જા ભોગવતી ગાનવતી સૂસેવમાના ભવન્તિ । એવ કન્દુકલીલાયાઃ સુખં પ્રત્યવસરં શ્રીરાધિકયા સહ રસિકાનન્દઃ સુમેવતે । તત્ર સહસ્રનિકુઞ્જૈર્ગ્રીષ્મર્તુઃ સેવ્યમાનો ભવતિ । રત્નજટિતાઃ પુષ્કરિણ્યઃ સુવાસિતૈઃ સુજલૈઃ સમ્પૂર્ણાઃ ભવન્તિ । તત્ર નમ્રા વૃક્ષાઃ પરિતઃ પુષ્પૈઃ ફલૈઃ સમ્પૂર્ણા ભવન્તિ । તત્ર રસિકાનન્દઃ શ્રીરાધિકયા સહ જલક્રીડાં કરોતિ । તત્ર મજ્જનવતી તરઙ્ગિણી જલકલ્લોલા પ્રેઙ્ખિતવતી ગેવ્યમાના અગાધજલા નાકાવતી સુપ્લવનવતી જલાભિજ્ઞા સુલહરી હસ્તપલ્લવા એતાશ્ચાન્યાઃ સખ્યઃ શ્રીરાધિકયા સહ જલક્રીડાં કુર્વન્તિ । તત્ર જલકીડાવ્યાજેન રસિકાનન્દો નાનાસુખં કરોતિ । તત્ર જલકીડાન્તે શ્પૃઙ્ગારવતી સખી શ૱ઙ્ગારસ્થાનં નયતિ । તત્ર પુષ્પવતી પુષ્પમણ્ડનં રચયતિ । તવ ગ્રીષ્મલીલાં નાનાસખીભિઃ સાર્ધં રસિકાન ન્દઃ શ્રીરાધિકયા સહ સંસેવમાનો ભવતિ । તતઃ પ્રાવૃલ્લીલાયા અનુભવઃ કથ્યતે । સહસ્રનિકુઞ્જૈઃ પ્રસારિતા પ્રાવૃરડાનન્દમયી ભવતિ । મેઘા નાનારૂપાણિ વિધાય મણિમયભૂમિં જલૈઃ સિઞ્ચમાના હરિતશાડલૈઃ શોભાયમાનાં કુર્વન્તિ । મયૂરપિકહંસસારસયુતાઃ પક્ષિણઃ નાનાકલશબ્દૈઃ કુઞ્જાન્તરં સેવમાના ભવન્તિ । કૌસુમ્ભાસુરઙ્ગાક્ષણિકાપ્રદ્યોતિતાઃ સોત્સાહાઃ સખ્યઃ રસિકાનન્દં શ્રીરાધિકયા સહ સેવન્તે । નાનાવૃક્ષાલતાભિર્ગ્રથિતાઃ પુષ્પૈર્નમ્રા ભવન્તિ । તત્ર રસિકાનન્દઃ શ્રીરાધિકયા સહ નાનોવેષૈઃ શ૱ઙ્ગારાનુભવેઃ સુરતાનન્દસુખં ભુઞ્જમાનો ભવતિ । પ્રાવૃલ્લીલાં નિરીક્ષ્ય લલિતાદયસ્તાં લીલાં સઙ્ગાયમાના ભવન્તિ । તતઃ શારદલીલાયાઃ સુખં સંવર્ણ્યતે । સહસ્રૈર્નિકુઞ્જૈઃ પ્રસૃતા શરત્ પ્રદ્યોતમાના ભવતિ । યત્ર સર્વાઃ લતાઃ પ્રફુલ્લિતાઃ સર્વે વૃક્ષાઃ પ્રફુલ્લિતાઃ સર્વાસાં સખીનાં મનાંસિ પ્રફુલ્લિતાનિ ભવન્તિ । યત્ર શારદનિકુઞ્જાઃ પ્રફુલ્લિતાઃ તત્ર મધ્યે નિત્યં રાસમણ્ડલં સદા રસિકાનન્દેન સેવિતમ્ । યત્ર શ્રીરાધિકા સ્વસખીભિઃ સાર્ધં નિત્યાનન્દલીલાં કરોતિ । તન્મણ્ડલં પઞ્ચયોજનાયતં નાનારઙ્ગમણિસ્તમ્ભશતશોભિતં નાનાલતાભિઃ પુષ્પિતાભિરાચ્છાદિતં પરિતઃ દ્વાદશશ્રેણિસંવલિતમ્ । તાસુ શ્રેણિપુ અનેકશઃ સખ્યઃ સંશોભમાના ભવન્તિ । પ્રથમશ્રેણ્યાં લલિતાવિશાખાદયઃ સખ્યઃ નાનાવિધાન્યુપકરણાનિ કુર્વન્તિ । દ્વિતીયશ્રેણ્યાં પ્રેમવત્યાદયઃ સખ્યઃ રાજમાના ભવન્તિ । તૃતીયશ્રેણ્યાં શ૱ઙ્ગારવત્યાદયઃ સખ્યો નાનાલઙ્કારસુખરૂપા અનેકશઃ શ૱ઙ્ગારં કુર્વન્તિ । ચતુર્થશ્રેણ્યાં ભોગવત્યાદયઃ સુગન્ધવત્યાદયઃ સખ્યો નાનાભોગરસાન્ રચયન્તિ । પઞ્ચમશ્રેણ્યાં પુષ્પવત્યાદયઃ સખ્યો નાનાવિચિત્રાણિ માલ્યાનિ કુર્વન્તિ । ષષ્ઠશ્રેણ્યાં ભૂષાવત્યાદયઃ સખ્યો રત્નજટિતાનિ હાટકમયાનિ મનઈપ્સિતાનિ રચયન્તિ । સપ્તમશ્રેણ્યામન્નપૂર્ણાદ્યાઃ સખ્યો નાનાન્નમયરસાન્ પાચયન્તિ । નાનાવિધાનિ પક્વાન્નાનિ પ્રતિક્ષણં નૂતનાનિ પાચયન્તિ । અન્યા રસભેદાન્ રચયન્તિ । અષ્ટમશ્રેણ્યાં સુગન્ધવત્યાદયઃ સખ્યો નાનાસુગન્ધાન્ રચયન્તિ । ગાનવત્યાદયઃ સખ્યો ગાનં કુર્વન્તિ । તન્તુવાદિન્યાદયઃ સખ્યસ્તા લૈઃ સુગાનં કુર્વન્તિ । નવમશ્રેણ્યાં વિલાસસુરતરઙ્ગવત્યાદયઃ સુરતાનન્દાદય અભિનવકલા આસનભેદાન્ સઙ્ગીતસાહિત્યકલાકુશલાઃ સખ્ય ઋગ્યજુસ્સામાથર્વણવેદરૂપાઃ સખ્યો નાનાસ્તુતિભેદૈર્ગુણગણનાં કુર્વન્તિ । એકાદશશ્રેણ્યાં રઙ્ગવત્યાદયો રઙ્ગરસભાવાન્ નાનાવિચિત્રાણિ વચનાનિ નમ્રાણિ પ્રેમોત્પાદકયુતાનિ શ્રાવયન્તિ

। દ્વાદશશ્રેણ્યાં સખીનાં વિવિધસઞ્ચાર આસ્તે । તસ્યાં શ્રેણ્યામન્તર્ભાગે ચતસ્રઃ શ્રેણ્યો વિરાજન્તે । તત્ર ગૃહાણિ શતશો હાટકમણિખચિતાનિ સંરોચમાનાનિ ભવન્તિ । રત્નવિથિષુ યોજ્યમાનાઃ શ્રેણયઃ સુવર્ણયૂથિકા અતિસુગન્ધા મુક્તાયૂથિકા અતિતરાં રાજમાનાઃ ભવન્તિ । તત્ર તરુપુષ્પાણિ નાનારઙ્ગમયાનિ સુગન્ધાઢ્યાન્યનેકશો રાજમાનાનિ ભવન્તિ । તસ્યાં હરિતપીતારક્તરક્તલતા અનેકશઃ શોભાભેદૈરત્યન્તં રાજમાનાઃ આસતે । મણિલતા આન્તરૈર્મણિપુષ્પૈઃ સંરાજમાના ભવન્તિ । તાસાં લતાન્તઃ સૂક્ષ્મલતાઃ પુષ્પિતા રાજમાના આસતે । તાસુ શ્રેણિષુ સખીનાં રમણસ્થાનાનિ સુરચ્યમાનાનિ ગુણગન્ધાઢ્યાનિ રૂપપ્રતિકૃતિયુતાન્યતિતરાં ભવન્તિ । સા શ્રેણી શ્રીરાધાયા અતિતરાં વલ્લભા આસ્તે । યદા ગૃહવનવિહારેચ્છાવિર્ભવતિ તદા તસ્યાં શ્રીરાધા સ્વયમેવ વિચિન્વતી સ્વયમેવ પુષ્પહારાવલીં ગ્રથયતિ । રસિકાનન્દઃ પુષ્પાણિ ચિનોતિ । હરિતપીતશ્વેતારક્તપુષ્પગુચ્છૈર્ગ્રથિતા હારાવલિં શ્રીરાધાયાઃ કણ્ઠે સ્વહસ્તેન પરિધાપયતિ । સા અતિતરાં વિરાજતે । તસ્યાં શ્રેણ્યામેકં મન્દિરં ગુપ્તક્રીડાસ્થલં મહાતેજોમયં મણિમયસપ્તભૂમિકં સંરાજમાનં ભવતિ । એકા ભૂમિઃ કનકમયી । તદુપરિ રત્નસોપાનસંવલિતા ભૂરારક્તમણિયુતા ભવતિ । અનેકરઙ્ગરઞ્જિતાન્તરા સોપાનપરમ્પરા સંરાજમાના ભવતિ । તદુપરિ ભૂઃ પુષ્પરાગરચિતાતિતરાં સુશોભાઢ્યા ભવતિ । તત્ર સોપાનપરમ્પરા શોભાયમાના ભવતિ । તદુપરિ સોપાનપરમ્પરા રત્નાવલીખચિતા નાનારઙ્ગૈઃ સુરચિતા જામ્બૂનદસુવર્ણભૂષિતા પરસ્પરસુગન્ધસંવલિતૈવાસ્તે । સુરચિતમણિવલ્લી પુષ્પપરાગપરિધિમતિતરાં કરોતિ । તદુપરિ ચન્દ્રકાન્તરચિતા તત્સકાશાત્ ચતુર્થી ભૂમિર્જલશીકરસંયોગિની ભવતિ । જલયન્ત્રશીકરકણિકામયૈઃ સુગન્ધજલૈઃ પૂરિતાયાં પુષ્કરિણ્યાં ગ્રીષ્માદૌ શ્રીરાધિકયા શ્રીરસિકાનન્દેન ચ સુરતાનન્દસુખમનુભૂયતે । યત્ર સુખમનુભવન્તાવાસાતે તત્ર મણિલતાગ્રથિતા વિદ્રુમદોલાસ્તે । રત્નજટિતદોલાયાં મણિજ્યોત્સ્નાઃ પ્રતિબિમ્બભાવાપન્ના એવ ભવન્તિતરામ્ । તદુપરિ સોપાનપરમ્પરા મણિગ્રથિતા ભવતિ । તદુપરિ સુગન્ધમણિરસવલિતા ભૂઃ સંરાજમાના આસ્તે । તત્ર ભૂમ્યાં સૂર્યચન્દ્રાગ્નિદેવતા આધિદૈવિકેન રૂપેણ સખીરૂપં વિધાયોપસેવમાના ભવન્તિ । તસ્યાં ભૂમ્યા સુરતાનન્દસુખમનુભવન્તો ભવન્તિ । શ્રીરાધિકાયાઃ રસિકાનન્દેન સહ દેહાત્સમુત્પન્નાઃ સખ્યો દૃષ્ટવતી કલાવતી સોત્સાહા પ્રેમસંવલિતા લજ્જાવતી ગુણવતી ગુણાઢ્યા ભવન્તિ । અન્યા અનેકસખ્યો રતિસુખમનુભવન્ત્યો ભાવાપન્ના ભવન્તિ । તદુપરિ સોપાનપરમ્પરા ચત્વરે આસ્તે । અત્યન્તસુખશ્રેણિસઞ્ચારા સોપાનપરમ્પરા રત્નાવલીભૂષિતા ભવતિ । રતિસુખસમ્પત્તિપ્રતિકૂજા અનેકભૂમયો યોજિતાઃ । એવંવિધં મણ્ડલં દ્વાદશદ્વારયુતમ્ । દ્વાદશદ્વારે દ્વાદશ શ્રેણિસઞ્ચારા ભવન્તિ । અતઃ પરમ્પરાશ્રેણિસઞ્ચારો ભવતિ । તન્મણ્ડલં યદેતત્ ષડ્ગુણપ્રસિદ્ધં ભવતિ । ષડ્ગુણાઃ ષડૃતવઃ ઉપસેવમાના ભવન્તિ । એતસ્મિન્ મણ્ડલે પૂર્વતઃ સખીરૂપં વિધાય સૂર્ય સુકોમલૈઃ કિરણૈરુપસેવમાન આસ્તે । તસ્ય મણ્ડલસ્યોત્તરતશ્ચન્દ્રઃ ઉપસૈવમાનો ભવતિ । એતસ્મિન્ મણ્ડલે પશ્ચિમતોઽગ્નિરાધિદૈવિકેન રૂપેણ ઉપસેવમાનો ભવતિ । ગ્રહાસ્તાસ્તારકા અન્યાનિ નક્ષત્રાણ્યાધિદૈવિકં રૂપં વિધાય સદા ઉપસેવમાના ભવન્તિ । ઇન્દ્રોઽપિ સખીરૂપં વિધાય દેવાઙ્ગનાભિઃ સહ વિમાનાવલીષૂપવિશ્ય સદોપસેવમાનો ભવતિ । પિતામહોઽપિ સૂક્ષ્મરૂપં વિધાયાન્તરિક્ષે તલ્લોકદર્શનાકાઙ્ક્ષો ભવતિ નિરન્તરમ્ । અન્યે દિક્પાલાઃ સંસિદ્ધા નિરન્તરમાધિદૈવિકેન રૂપેણ તન્મણ્ડલમુપસેવમાનાસ્તન્મણ્ડલલોકાનન્દમગ્ના ભવન્તિ । તન્મણ્ડલોપાસકા ભક્તા અન્યં ન ભજેરન્ । અન્યધર્માસક્તા ઇદં મણ્ડલં ન જાનન્તિ ।

સા લક્ષ્મીઃ પુનરુવાચેદમ્ । યે મણ્ડલમુપાસતે ન કિં કર્મ કુર્વન્તો ભવન્તિ? સ હોવાચ । તેઽનન્યોપાસકાઃ ભવન્તિ । અનન્યભજનસિદ્ધા આત્મભાવા ભવન્તિ । આત્મભાવા મણ્ડલમુપાસતે । આત્માનાત્મભાવો ભવેત્ । અતિતરામાત્માનન્દે મગ્ના અન્યરસં ન ભાવયન્તિ । આત્માનન્દે મગ્ના અભક્તાન્ન સ્પૃશન્તિ । આત્માનન્દે મગ્ના આત્મભાવા ભવન્તિ । નાન્યં શ‍ૃણ્વન્તિ ન નમન્તિ ન ગાયન્તિ । તે ભક્તા આત્મરસભાવિતા આત્મનો રતિરસભાવનયાનન્દં શ‍ૃણ્વન્ત્યાનન્દં ગાયન્તિ । આનન્દયુતા ભક્તા અતિરસમગ્ના ગુણાન્ ગૃણન્તિ । અતિરસમગ્નાસ્તદુચ્છિષ્ટમુપભુઞ્જતે । અનુચ્છિષ્ટં કદાચિન્ન ભુઞ્જતે । તન્મણ્ડલોપાસકાઃ ભક્તા અભક્તાન્ ન સ્પૃશન્તિ । યે અન્યોપાસકા ભક્તા આનન્દેઽનાશ્રિતાઃ કર્મજડાઃ કર્મકાણ્ડોપાસકા એવ તે । અગ્ન્યુપાસકા યે બ્રાહ્મણા બ્રહ્મવર્ચસોપાસકા એવ તે । તેષાં સમ્ભાષણં તન્મણ્ડલોપાસકઃ પ્રમાદેનાપિ ન કુર્યાત્ । યે અન્યધર્મરહિતા અન્યાસક્તિરહિતાસ્તે તન્મણ્ડલં પ્રાપ્નુવન્તિ । અન્યધર્મરહિતા એવ પ્રાપ્નુવન્તિ । અન્યે આત્માનં ન વિદુરાત્મના । કિં બહુનોક્તેન ધર્મેણ । યે બ્રાહ્મણા અન્યવિદ્યોપાસકાઃ કર્મજડાઃ કર્મકાણ્ડોપાસકાઃ કાલોપાસકાઃ કર્મધર્મદેવપિત્રુપાસકા એવ ભવન્તિ તે । યે શૈવાઃ શાક્તાઃ સુરામાંસરતાઃ કૌલા જૈનાઃ પાતઞ્જલા મીમાંસકાઃ જડતાં પ્રાપ્તાશ્ચાર્વાકા અન્યધર્મદૃઢાસક્તા ભવન્તિ । યે તાં વ્રજેશ્વરીં રસિકાનન્દેન સહોપાસતે સદાનન્દરસમનુભવન્તો ભવન્તિ । રતિકલાકોમલા ગુણગણનાં કુર્વન્તિ । તમેવ રસં ગાયન્તો ભવન્તિ । અતિરતિમાપદ્યમાના ભવન્તિ । યે દર્ભં હસ્તે ગૃહ્ણન્તિ તે તં રસં ન પ્રાપ્નુવન્તિ । તિલાઞ્જલિં પિતૃણાં યે દદતિ તે તન્મણ્ડલં ન પ્રાપ્નુવન્તિ । દેવાશ્ચાસુરાશ્ચ કર્મકાણ્ડોપાસકા એવેતિ, દેવાઃ સદ્વિદ્યોપાસકા વૈષ્ણવા એવેતિ, ગુણાતીતાસ્તે વૃન્દાવનેશ્વરીમુપાસતે । રસિકાનન્દેન સહ ઉપસેવ્યમાનમભિયન્તિ । અતિગુણમગ્ના રાત્રૌ દિવા સદા સુરતાનન્દસુખમનુભવન્તો યુજ્યન્તે । રતિકલાકૌતુકાનિ સમ્ભોક્ષ્યમાણા ભવન્તિ । ભક્તાનામનુગ્રહાત્ ભગવાન્ રસિકાનન્દોઽનુગ્રહં કરોતિ । તે મણ્ડલં વિદુઃ । યે વ્રજમણ્ડલં સેવન્તે તે મણ્ડલં જાનન્તોઽન્યાસક્તિં વિના મણ્ડલાસક્તિં કુર્વન્તઃ સદા સર્વલોકરસલીલાયામાસક્તા ભવન્તિ । યે મનોરથશતૈઃ રાત્રૌ દિવા તલ્લીલાઃ ગ્રથ્નન્તિ તે તન્મણ્ડલે ભાવાપન્ના ભૂત્વા પ્રતિષ્ઠિતચિત્તા ભવન્તિ । તન્મણ્ડલં શ્રુત્વાનન્દમાસીદન્તિ ।

સા લક્ષ્મીઃ પુનરુવાચેદં નારાયણં તદા । રમારમણ વૈકુણ્ઠે યો વૈ ક્રીડયિત્વાત્મભાવો ભવતિતરામતિપ્રીત્યા નારાયણોઽયં વદત્યભીષ્ટમનન્તરમ્ । અનયે વ્રજમણ્ડલે પઞ્ચયોજનાયતં મણ્ડલમસ્તિ । અધિતન્મણ્ડલમાસેદિવાન્ રુચિરરતિમાતનોતિ । યત્ર શતશો ગૃહાણિ હાટકમણિમયાનિ સહસ્રપઙ્ક્તયોઽતિતરાં શ્રેણયો વિરાજમાના ભવન્તિ । યેષુ મન્દિરેષુ સમભૂમિષ્વતિતરામભ્યેત્ય મનુષ્યા રતિરસમગ્નાઃ ભાવાપન્ના ભવન્તિ । મણિભૂમિષ્વતિતરામાસ્તે પુરુષઃ । તત્ર ગોપાનાં ગૃહાણિ પઙ્ક્તિશો વિરાજમાનાનિ ભવન્તિ । ગોપાનાં ગૃહે ગૃહે અષ્ટમહાસિદ્ધયો રાજમાનાઃ સન્તિ । તેષાં ગૃહે ગૃહે કલ્પદ્રુમા રાજમાના એવ ભવન્તિ । તેષાં ગૃહાશ્રમઃ કેવલં ક્રીડાર્થમેવ ભવતિ । તેષામાત્મસુખાર્થમેવ ન ભવતિ । કદાચન તેષામતિરસક્રીડા । અતિરસમગ્ના હિ સંસિદ્ધા એવેતિ તે ગોપાઃ ગાયન્તિ રસિકાનન્દસ્ય યશઃ । વ્રજેશ્વર્યા સહ સઙ્ક્રીડમાનો માનેન રસિકાનન્દો ગવાં યૂથાન્યનેકશો હરિતપીતશ્વેતશુભ્રધૂમ્રાતામ્રાણિ વિરાજમાનાન્યનુયાતિ । કપિલાકજ્જલિકાશુભ્રાશુભ્રાભ્રાજમાનાનિ યૂથાન્યનેકશો રાજન્તે । યૂથેષુ પ્રતિપઙ્ક્તિ ઘટોઘ્નીઃ શતશો રાજમાનાઃ સા વ્રજેશ્વરી પ્રતિક્ષણમભ્યેતિ । ગાઃ કૃપાદૃષ્ટ્યાદ્યાસેદિવાન્ સમ્પોષ્યમાણો ભવતિ । સિદ્ધાભં પઞ્ચયોજનાયતં ગવામમૃતમયં મણ્ડલમ્ । ગવાં ગણા

ગોપૈઃ સહ સઙ્ક્રીડિતાઃ ભવન્તિ । તત્ર દુગ્ધસિન્ધુરાસ્તે । વત્સવત્સતરીસહિતા મહોક્ષાઃ સઙ્ક્રીડમાનાઃ ભવન્તિ । તત્ર મલમૂત્રરહિતા ગાવોઽમૃતરસં સમ્ભુઞ્જાના ભવન્તિ । તત્ર તત્ર તા ગાવઃ કુઞ્જે નિકુઞ્જે ક્રીડમાના ભવન્તિ । અતિરતિમગ્ના ગાવઃ ક્રીડાપરા ભવન્તિ । નન્દગૃહાત્પરિતો ગવાં ગણાઃ કોટિશઃ શોભમાનાં ભવન્તિ । તાઃ સર્વા ગોપ્યો દધિમથનક્રિયાપરા રસિકાનન્દસ્ય વ્રજેશ્વર્યા સહ ક્રીડાં તાં તાં લીલાં ગાયમાના ભવન્તિ ।

સા લક્ષ્મીઃ પુનરુવાચેદમ્ ।
કામદુઘયા કિં તપ આચરિતમ્? અતિરતિપ્રીતિઃ કથમભૂત્? યાસામેવ દુગ્ધદધિનવનીતરસા ઘૃતરસાસ્તયા નિકુઞ્જદેવ્યોપસેવ્યમાના વૃષભાનુગૃહે પ્રકટિતા ભવન્તિ । નિકુઞ્જદેવ્યા સહ તસ્મિન્ ગૃહે પુરુષો હ વૈ સઙ્ક્રીડામાતનોત્ । તસ્મિન્ ગૃહે ગવાં ગણાઃ શતશો રાજમાના ભવન્તિ । તાઃ કિમાચરિતવત્યઃ કિં કૃતવત્યઃ કામાપેદિરે રતિપ્રીતિં કથમાસત ? કિં શ‍ૃણ્વન્ત્ય આપેદિરે?

સ હોવાચ નારાયણોઽયમ્ । ગવાં ભેદૌ દ્વાવેવ ભવતઃ । સંસિદ્ધાઃ સાધનસિદ્ધાશ્ચ । યા ગાવો વ્રજમણ્ડલે તિષ્ઠન્તિ તાઃ સંસિદ્ધાઃ ભવન્તિ । એકસ્મિન્નવસરેઽહં તાં વ્રજેશ્વરી રસિકાનન્દેન સહ સંવલિતા તસ્મિન્ વ્રજમણ્ડલે મનસાસેદિવાન્ । કામદુઘા યા તપ આતનોત્ તસ્મિન્નવસરે વૈકુણ્ઠે આગતા । કામદુઘા માં નિરન્તરં ધ્યાનાવસ્થાયાં રમમાણં વીક્ષ્ય વિચારિતવતી । અહો નારાયણોઽયં સદા લક્ષ્મીકાન્તોઽપિ પ્રતિકલં કસ્ય યાનાપન્નૌ ભવતિતરામ્ । પશ્ચાત્ યં નારાયણો દેવ્યા સહ ધ્યાયતિ સ્મ । યસ્યાવતારકલાઃ કોવિદાઃ સર્વે ધ્યાત્વા ઉપજીવન્તિ । યદ્યેવંવિધો નારાયણઃ સર્વસુખસમ્પત્તિપૂર્ણાનન્દઃ કસ્ય ધ્યાનમાપન્ન આસેદિવાનિતિ । તથૈવેત્યસ્યા મનોભિલાષં જ્ઞાત્વાહમુવાચેદમ્ । અહો કામદુઘે તવ મનસિ કિમાગતમિતિ । સોવાચેદમ્ ।

નમોઽનન્તાય મહતે કૃષ્ણાયાકુણ્ઠમેધસે ।
યોગેશાય ચ યોગાય બ્રહ્મણેઽનન્તશક્તયે ॥

ત્વયાનુગૃહીતા ભક્તા આત્માનં તન્મયં મત્વા આત્મભાવા ભવન્તિ । ગવાં યૂથાનિ શતશો વિરાજમાનાન્યમૃતરસસંજ્ઞિતા ગાવૌ ભવન્તિ । તસ્મિન્નવસરે વનેષુ તૃણસંવલિતા નિકુઞ્જા અતિરસપૂર્ણા જલાશયાઃ શતશઃ શોભમાના આસતે । તસ્મિન્ સ્થાને સભાષમાણાન્ તૃણજલૌષધયઃ સમ્ભાષમાણા ભવન્તિ । અતિપુષ્ટા ગાવો ગોષ્ઠ્યા આસેદુષ્યઃ સુખસમ્ભોજ્યદુગ્ધરસઘૃતરસદધિરસનવનીતરસાદ્યાન્ ભાવાપન્ના દાશુષ્યો ભવન્તિ । શુભ્રશ્વેતકર્બુરિતાઃ ગાવો રસસંવલિતા ગોષ્ઠાન્યનેકશો રાજમાનાન્યભિયન્તિ । તા ગોપ્યો દધિમન્થનઘોષેણ સહ સઙ્ગાયમાના ભવન્તિ । તાસાં શ‍ૃઙ્ગારસુખમાપદ્યમાનોઽભવત્ । ગોલોકાદાગતા કામદુઘા નારાયણમુખાચ્છ્રુતમાત્રે ગોવર્ધનાદ્રૌ શિરસિ મન્ત્રં જપ્ત્વા તદ્ભાવેનાભવત્ । સા વ્રજેશ્વરી રસિકાનન્દેન પ્રત્યક્ષભાવમાતેને । સા પ્રસન્ના સતી તાં લીલાં દત્તવતીતિ ।

નારાયણઃ પ્રત્યુત્તરમુવાચ ।
અહો પ્રિયે અસ્ય લોકસ્ય કથા શ્રૂયમાણા સર્વેષાં નિવિશમાના હૃદિ ગતં કામક્રોધાદિકં નાશયતિ । અતિરતિભક્તિરાપદ્યતે રસિકાનન્દરતિરાપદ્યતે । વર્ણાશ્રમસ્વધર્મા બાધકા ન ભવન્તિ । કામદુઘા ગોવર્ધનાદ્રિશિરસિ ગોવિન્દપુષ્કરિણ્યા તપશ્ચકાર । મહામન્ત્રમમું જજાપ । શ‍ૃણુ તન્મન્ત્રધ્યાનમ્ । ૐ

નમઃ શ્રીરાધારસિકાનન્દાભ્યામ્ । મૂલમન્ત્રોઽયમ્ । દ્વાદશાક્ષરસંવલિતમોઙ્કારબીજસંવલિતં યૌ ધ્યાયેત્ સ એવ તાં લીલાં પ્રાપ્નોતિ । અત એવ કૃતં પુષ્કરિણ્યાં ગોવિન્દકુણ્ડમિતિ નામ્ના પ્રસિદ્ધં કુઞ્જમ્ । પૃથિવ્યાં તસ્મિન્નદ્રૌ સા વનફલતૃણૌષધર્ભિક્ષયામાસ । સા કામદુઘા તપઃ આચરન્તી તસ્મિન્નદ્રૌ પરિચક્રામ । એવ શતં સમાસ્તપ આચરિતવતી । યત્ર ગોવર્ધનાદ્રૌ રત્નધાતુમયલતૌષધયઃ સદા પ્રફુલ્લિતાઃ ફલિતા રસસંવલિતાઃ અતિશોભાયમાના ભવન્તિ । યત્ર ગહ્વરાણિ રત્નહાટકમયાન્યનેકશઃ શોભાય માનાનિ ક્રીડાસ્થાનાનિ ભવન્તિ । અનેકરઙ્ગવિચિત્રા ઓષધયો નાનારઙ્ગૈઃ રચિતા એવ યત્ર ફલપુષ્પૈર્ભાસિતા ભવન્તિ । યત્ર સા વ્રજેશ્વરી રસિકાનન્દેન સહ સઙ્ક્રીડામતિતરામાતનોતિ । યત્ર સખીનાં વૃન્દાનિ વિહારપરાણિ । તત્ર તસ્યાં પુષ્કરિણ્યાં સા વ્રજેશ્વરી સ્વસ્વરૂપં દર્શયામાસ । રસિકાનન્દરૂપં રસરૂપમેવ સાક્ષાદેવંવિધમતિગુણસંવલિતમેવાસ્તે । નૂતનો નવજાયયા સહ ક્રીડનં દર્શયામાસ । સા કામદુઘા સ્તોત્રં ચકાર । નમો રસાત્મને । નમો જ્ઞાનાત્મને । નમઃ સદાવનવિહારિણે । નમઃ સ્વભક્તકર્મસ્વભાવદુઃખનાશહેતવે । નમઃ પ્રાકટ્યદેહરૂપિણે । નમો યમુનાજલકલ્લોલવિહારાત્મને । નમઃ કામકેલિકૌતુકાત્મને । નમઃ કામપ્રિયાય । નમઃ કામાત્મને । નમઃ કામસંવલિતદેહદાત્રે । નમ આદિકર્ત્રે । નમ આદિહેતુરતિદાત્રે । નમઃ શ્રીરાધાધ્યાનાપન્નદેહાત્મને । નમો રસાત્મને । નમો રસલમ્પટપરિપૂર્ણદેહદાતૃરૂપિણે । નમોઽનિર્વચનવિહારિણે । નમો રતિદાત્રે । નમો રતિકેલિકલાકૌતુકાત્મને । નમો ભક્તિરતિદાત્રે । નમો જ્ઞાનનિર્વાણદાત્રે । નમ આનન્દસ્વરૂપિણે । નમસ્તદ્દ્રષ્ટ્રે । નમસ્તસ્ય હેતવે । નમઃ કલરાસજ્ઞાનવિહારાત્મને । નમોઽગુણાય । નમઃ સૃષ્ટિરૂપગુણદાયિને । નમો ગુણકેલિસુરતાનન્દસુખભોક્ત્રે । નમો ભોગદાયિને । નમો ભોગાત્મને । નમ આત્મરૂપિણે । નમઃ સુરતાન્તન્દરૂપરસદાત્રે । નમોઽનન્તચરિત્રદાયિને । નમ ક્રમલીલાત્મને । નમઃ શ્રીરાધાકૃષ્ણરૂપિણે । નમઃ શ્રીકૃષ્ણરાધારૂપિણે । નમોઽનેકવિહારદેહધારિણે । નમઃ શતસહસ્રકોટિશો લક્ષકોટિવિહારરૂપિણે । નમો લલિતાપ્રતિક્ષણસુખદાત્રે । નમઃ કુઞ્જાન્તરવિશાખાદ્યનેકસખીવિહારાત્મને । નમ આદ્યનાદિરૂપસંસિદ્ધભક્તિરૂપિણે । નમો દાનધર્મદાત્રે । નમઃ સુખરૂપિણે । નમો વ્રજાવિર્ભાવભાવિતાય । નમોઽપ્યન્તદાનરૂપિણે । નમઃ સદા વૃન્દાવનશ્રેણિવિહારિણે । નમ આદિદ્વાદશવનવિહારાત્મને । નમઃ પૃથિવ્યાં યાનિ રૂપાણિ સુન્દરાણ્યનેકશસ્તત્તવ વિજાનીયાત્ । ઇતિ લક્ષ્મીલજ્જાધૃતિકાન્ત્યનેકાકારાય ગુણરતિદાયિને નમો નમઃ ઇતિ સ્તુત્વા સ્થિતાં કામદુઘાં તદ્દર્શનમહોત્સવાકુલાં રસિકાનન્દસ્તયા નિકુઞ્જદેવ્યા સહોવાચેદમ્ । અહો કા ત્વં સ્તુતિં બ્રુવાણાસિ । મમ ભક્તિરિહ લોકે દુર્લભા । દુર્લભતરં વરં વરય । તવ મનસિ મમ દર્શનાદધિકં ન કિઞ્ચિદવશિષ્યતે । તવ સ્તવેન યો નિત્યં સ્તૌતિ સમાહિતઃ સદાભીષ્ટં પ્રાપ્નોતિ । પુનરુવાચેદં કામદુઘા યદિ દેયો વરો નાથ તવ લોકે વસામ્યહમ્ । રસદધિરસદુગ્ધરસનવનીતરસઘૃતરસફાણ્ટરસૈરહં સેવે ।

રસિકાનન્દ ઉવાચ । અનેકશઃ સ્વાવિર્ભાવેન લોકે મમ વલ્લભા ત્વં સદા વસ । અહં ત્વાં રક્ષિષ્યામિ । વનવિહારે યથેચ્છં વિહર । યે અનન્યાશ્રયા મમ ભક્તાસ્તેષાં ન વર્ણાશ્રમધર્મા આન્તરાલિકા જાયન્તે । તેષાં ન કર્માણિ આન્તરાલિકાનિ જાયન્તે । તેષાં સાધનમાન્તરાલિકં ન જાયતે । વ્રતાનિ યજ્ઞાશ્છન્દાંસિ યોગક્ષેમફલાનિ ચાનન્યાનિ ધર્મસાધનાનિ યત્કિઞ્ચિદપિ કૃત્યં સર્વમાન્તરાલિકં ન જાયતે । યે બ્રાહ્મણાઃ કર્મજ્ઞાનસાધકાસ્તેષાં જ્યોતિષાગમકર્મસાધકાસ્તેષાં ચ સઙ્ગો હઠાત્ ત્યાજ્ય એવેતિ વચનમસ્તિ । દશયોજનં વ્રજપરિણાહઃ । તત્ર પશુપક્ષિણો મૃગા ગાવોઽન્યે યે વૃક્ષાઃ અનન્યપરા આસતે । અતિરસમગ્ના ગાયન્તિ । તસ્મિન્મણ્ડલે દેવાઃ

દર્શનકાઙ્ક્ષા એવ ભવન્તિ । ભક્તક્રિયામાપદ્યમાના ભક્તાસ્તન્મણ્ડલં વનવિહારસ્થાનં યે વ્રજવાસમિચ્છન્તિ તે એવ સર્વધર્માતિરિક્તા ભવન્તિ । કર્માતિરિક્તા ભવન્તિ । સઙ્ગાતિરિક્તા ભવન્તિ । વ્રજમણ્ડલોપાસકાઃ ભવન્તિ । અહો લક્ષ્મિ સા સૃષ્ટિસ્તુ સૃષ્ટ્યતિરિક્તૈવાસ્તે । તત્સૃષ્ટેરુત્પદ્યમાનો રસમાર્ગમાશ્રિતો ભવતિ । મનઃ સોત્સાહં યદ્યેતસ્મિન્મણ્ડલે તદઙ્ગીકારં પ્રાપ્તોઽમનોમોહોઽતિતરાં પ્રતિસંયોક્ષ્યમાણસ્તં રસમનુભવન્ ભાવાપન્ન આસ્તે । યદા યદા દેવાશ્ચ પિતરશ્ચ કાલશ્ચ વ્રજાતિસાધને યતન્તે  તાવત્સહસ્રશાખાધ્યાયી ભવતિ । સર્વયજ્ઞકર્મકરોઽપિ તન્મણ્ડલં સ્વપ્નેઽપિ ન જાનન્તિ । જ્ઞાનિનો યે બ્રહ્મબોધકા યોગિનસ્તપસ્વિનસ્તે સ્વપ્નેઽપિ તન્મણ્ડલં ન જાનન્તિ ।

સા લક્ષ્મીઃ પુનરુવાચેદમ્ । કૈશ્ચિહ્નૈસ્તાન્ ભક્તાન્ જાનીમહે ।

સ હોવાચ । તે સદા પ્રેમમાર્ગિણો ભવન્ત્યેવ । ન નિર્વિણ્ણા નાતિસક્તા ગૃહાદૌ વિષયાદૌ નાતિસક્તા યદૃચ્છયા પ્રાપ્તવસ્તુમાત્રમુપસેવમાના એવ ભવન્તિ । ન નિર્વેદો નાશ્રમો ન કર્મ યદૃચ્છાકથાસેવા ભક્તાનાં પ્રીતિરનન્યા ભક્તિર્ભવતિ । એવંવિધસંસારાતિરિક્તઃ સ્વભાવસંસિદ્ધો ભવતિ । તતસ્તાં લીલાં પ્રાપ્તવન્તો ભવન્તિ । એવમુપાસકાસ્તસ્મિન્મણ્ડલે ગત્વાતિતરાં સંયોક્ષ્યમાણાઃ આપદ્યન્તે ।

સા લક્ષ્મીઃ પુનરુવાચેદમ્ । રસમાર્ગીયા ભક્તાસ્તન્મણ્ડલં પ્રાપ્તવન્તઃ । તેષામેકા દશા । તેષાં કા ગતિઃ?

સ હોવાચ । તન્મણ્ડલોદ્ભવાઃ ભક્તા આત્મરતિગુણા રતિગુણાઢ્યા અનન્યમાર્ગાઢ્યાસ્તાં લીલાં પ્રાપ્તવન્તસ્તન્નામાઙ્કિતવર્ષ્માણસ્તુલસીકાષ્ઠાઙ્કિતદેહા આત્મનામ્ના સુખાલઙ્કૃતશરીરા રાસાદિલીલાધ્યાનાવસ્થાયામાપદ્યમાના યુજ્યન્તે । કુઞ્જે નિકુઞ્જે શ્રેણ્યાં શ્રેણ્યાં રતિયોગ્યતાભાવમાપદ્યમાના ભવન્તિ । તામેવ કથાં પ્રતિક્ષણં નૂતનામાસેવમાના આસતે । શ્વપચો વા બ્રાહ્મણો વા વર્ણાન્તરો વા યો ભક્તાનાં સહ સઙ્ગમાપદ્યતે સ એવ તાં લીલાં પ્રાપ્તો ભવતિ રતિમાસેદિવાન્ યદિ તદુચ્છિષ્ટે કદાચિદન્નબુદ્ધિસ્તેષામસ્તિ । તદુચ્છિષ્ટે જલે સદા તીર્થબુદ્ધિઃ ભવતિ । તત્ર તત્કથાયાં સાક્ષાદ્બુદ્ધિર્ભવતિ । યે મણ્ડલમુપાસમાનાસ્તેષાં કો ધર્મઃ? કિં કર્મ? કો રસો ભવતિતરાં? યે તન્મણ્ડલમુપાસમાનાઃ ભવન્તિ તેષાં કિં તીર્થવ્રતયજ્ઞધર્માઃ સન્તિ? કિં બાધ્યમાનં ભવેત્ । તેષાં મુખ્યં મનો ભવતિ । યે ગુણાઢ્યા રસરૂપિણ આનન્દરસનિમગ્નાસ્તે ગુણતદ્ભાગિનો ભવન્તિ । તન્માત્રપ્રાપ્તમાર્ગોઽયં લોકઃ સદાણ્ડજો ભવેત્ । આત્માનન્દે મગ્નાસુ યે રાત્રૌ દિવા વ્રજધ્યાનાપન્ના ભવન્તિ સદા તેષાં નિત્યં નિકુઞ્જદેવ્યા અનુગ્રહો ભવતિ । યે મહાલીલાયામત્યાસક્તાસ્તેષાં કદાચિત્કાલધર્મભયં ન ભવત્યેવેતિ સદ્યઃ કૃતાર્થતોત્પદ્યમાના ભવતિ । અવર્ણોઽપિ સવર્ણતાં પ્રાપ્નોતિ । યે ન ભવન્તિ તે દુષ્ટગતયો ભવન્તિ । યે બ્રજમણ્ડલોપાસકાસ્તે વ્રજે નિવસન્તિ । યે  રાસમણ્ડલોપાસકાસ્તે રાસલીલાં પ્રાપ્નુવન્તિ । અનન્તસુખં સમ્ભુઞ્જતે । યા યશોદાદ્યા લીલામુપાસમાના ભજને પ્રપદ્યમાના ભજનાનન્દે સંયોક્ષ્યમાણા ભવન્તિ । યે નન્દાદયોઽત્યન્તસખીભાવમુપાસમાના અત્યન્તસઙ્ગં પ્રાપ્તાસ્તે રમણાનન્દસખીસમૂહં પ્રાપ્તાઃ । તે તાં લીલાં પ્રાપ્નુવન્તિ યે નિકુઞ્જદેવીં ધ્યાયન્તિ રમણાનન્દમુપાસતે । અત્યન્તં સુરતાનન્દં પ્રાપ્તા યે સંયોક્ષ્યમાણા વ્રજમણ્ડલં મધ્યસ્થાનં ભજન્તિ તે મહાલીલાં પ્રાપ્ય સમ્ભોગસુખં સમ્પ્રાપ્નુવન્તિ । સ આહ લક્ષ્મીમ્ । શ્રુતપરકાષ્ઠા યે સખીભાવ પ્રાપ્તવન્તસ્તે ગોપાસ્તાં લીલાં સમ્પ્રાપ્નુવન્તિ । યઃ સર્વધર્માન્પરિત્યિજ્ય તન્મણ્ડલોપાસકો ભવતિ સ એવ તાં લીલાં પ્રા પ્ય સર્વવ્રતાતિરિક્તો જ્ઞાનાતિરિક્તો

વિધૂતવિધિનિષેધકૃત્યાકૃત્યગુણાગુણભાવાભાવઃ સદા સઙ્કૃષ્યમાણો લીલાયાં પ્રતિપદ્યમાનઃ સંયુજ્યતેઽતિતરાં રસે । અહો લક્ષ્મિ ષડ્વિધેયં રાસમાયા કથિતા । સર્વે લીલાં પરિત્યજ્ય તત્સ્થાનં પ્રાપ્તવન્તો ભવન્તિ ।

સા લક્ષ્મીઃ પુનરુવાચેદમ્ । કીદૃગ્વિધં રાસસ્થાનં ? નિરન્તરં તત્સ્થાનસ્યોપાસકા યદુપાસનામાત્રાત્તાં લીલાં પ્રાપ્નુવન્તિ તદ્વર્ણય ।

સ હોવાચ નારાયણોઽયમ્ । એકં સહસ્રાદિત્યસઙ્કાશમતિહ્લાદમયમ્ । અહં બ્રહ્મા રુદ્રો દેવા દિક્પાલા યસ્માત્સમુત્પદ્યમાનાઃ યસ્ય પ્રતાપાત્તસ્મિન્ સ્થાને સંસિદ્ધાઃ સાધનસિદ્ધા અનેકશો ભક્તાઃ । યત્ર મણય આધિદૈવિકેન રૂપેણ તેજાંસિ દદતિ । યત્ર સંસિદ્ધઃ સૂર્યઃ સખીરૂપં વિધાયોપસેવતે । સૂક્ષ્મસૂક્ષ્મરૂપં વિધાય યત્રાત્મના ચન્દ્રઃ સેવમાનો ભવતિતરામ્ । યત્રાગ્નિઃ સખીરૂપં વિધાયોપસેવમાન આસ્તે । દેવાસ્તસ્મિન્ સ્થાને સદા સંસિદ્ધા એવોપસેવમાના આસતે । પૃથિવ્યાં સૂર્યચન્દ્રનક્ષત્રાણિ અન્યે યે સાધનોપકારકાસ્તે સર્વે ઉપસેવમાના એવાસતે । અન્યાસ્તુ યસ્માત્સ્થાનાદિમાઃ પ્રજાઃ સમુત્પદ્યમાના ભવન્તિ તલ્લોકં વર્ણયામિ । અનેકશઃ કોટિબ્રહ્માણ્ડકાન્યતિશયાવિર્ભાવમાપદ્યમાનાનિ સન્તિતરામ્ । તસ્મિન્ સ્થાને મધ્યે મધ્યે આવરણજ્યોતિરાસ્તે । આવરણસ્ય મધ્યે સહસ્રયોજનપરિણાહવતિ ગુણગણનાય શ્રીરાધાકૃષ્ણસ્ય ગુણગણાઃ સઙ્ગીયન્તે । પ્રથમપરિણાહે ગવાં ગણાઃ ક્રીડાપરા એવ ભવન્તિ ગોપગોપીભિઃ । એતાનિ ક્રીડાસ્થાનાનિ તૃણજલૌષધીલતાફલપુષ્પપત્રકોમલાન્યાસતે । મધુઘૃતદુગ્ધદધિનવનીતાદ્યા રસાઃ સંસિદ્ધા ભવન્તિતરામ્ । યત્રાન્નાનિ ખાદ્યપેયચોષ્યલેહ્યવિવિધપક્વરસાનેકસંવલિતાનિ ભવન્તિ । યત્ર વૃક્ષા અમૃતમધુધારાઃ અતિતરામાસેદુષાં વર્ષન્તિ । યત્ર પુષ્કરિણ્યોઽમૃતપૂર્ણા ભવન્તિ । તત્રામૃતં પીત્વા જરામરણગર્ભોત્પત્તિવિનાશા ન ભવન્તિતરામ્ । અમૃતોદં નામ સરો દેવૈરુપપીયમાનં ભવતિ । તયા નિકુઞ્જદેવ્યા સ્વદૃષ્ટ્યમૃતેન સમ્પૂર્યમાણં ભવતિતરામ્ । તસ્મિન્ સ્થાને ગોપગોપીગણાઃ પુલિનનિલીનાઃ સદા ક્રીડાપરાઃ ભવન્તિ । દ્વિતીયપરિણાહે વાટિકા ક્રીડાસ્થાનાનિ વૃક્ષાઃ પક્વફલપુષ્પનમ્રાઃ પત્રૈર્નમ્રા ધારા આસીદન્તિ । ક્રીડાપરાણાં ગોપીનાં ગણા નિકુઞ્જદેવ્યાઃ શ્રીરાધાયાઃ સ્વાવેશેન ક્રીડાપરાઃ સુરતાનન્દેન સમ્ભોક્ષ્યમાણા ભવન્તિ । યત્ર ભક્તાસ્તત્ક્રીડાપરાસ્તદ્ધ્યાનપરાસ્તદ્રૂપા આસતે । તસ્મિંસ્થાને યે ભક્તાઃ સદા રસમાર્ગિણસ્તેષાં સઙ્ગ આસ્તે । અહો ભક્તિમાર્ગરસસંવલિતોઽનુભવન્ તસ્ય સઙ્ગં રસિકાનન્દસ્વરૂપો ભવતિ । ધર્મઃ સ એવ કર્માણિ સ એવ વિદ્યા સ એવ ભવતિ । યે ધર્માસ્તે અધર્માઃ । યે કર્માણિ તાન્યેવાકર્માણિ ।

તૃતીયમાવરણં મહાક્રીડાસ્થાનમ્ । તસ્મિન્ સ્થાને એકસપ્તત્યધિકકોટયો નિકુઞ્જાઃ શોભાયમાના આસતે । યસ્મિન્નાવરણમધ્યે રમણસ્થલાનિ કોટિશો રાજમાનાનિ । યસ્મિન્ સ્થાને મણીનાં વલયા સુગન્ધયુતાઃ રાજમાના ભવન્તિ । પદ્મરાગમણિલતાગ્રથિતા નીલમણિપુષ્પસંવલિતા ભવન્તિતરાં મધ્યે મધ્યે । વિદ્રુમકૃતા હાટકકોટયો લતાગ્રથિતા હાટકભૂમિષુ રમણસ્થાનં શોભાઢ્યં કુર્વન્તિતરામ્ । રમણાનન્દોઽયં સદા ભક્તાનાં સુખકરો ભવતિ । યસ્ય લોકસ્ય કથાશ્રવણમાત્રાત્ સર્વે વર્ણાઃ સર્વે ધર્માઃ વિધર્માણઃ પ્રતિભાન્તિતરામ્ । યસ્મિન્નાવરણે સ્વામિન્યાઃ શ્રીરાધાયાઃ શ્રીરસિકાનન્દસ્ય ચ સદા ક્રીડાસ્થલં ભવતિ । મણિલતાનાં સઞ્ચારે હંસીનાં યૂથાઞ્જન્તસોલ્લાસાનિ પીતગ્રીવાણિ રક્તચઞ્ચુપુટાનિ રાજમાનાનિ ભવન્તિ । તે સુસ્વરેણ સંજ્ઞિતા ઇવ સામગાનં કલકણ્ઠૈઃ કુર્વન્તૌ ભવન્તિ । તસ્મિન્ આવરણે લતાયાં શુકયૂથાન્યત્યન્તહરિતાનિ રક્તચઞ્ચુપુટાનિપીતપુચ્છપક્ષાણિ । યૈઃ પ્રતિશાખં

ગાન્ધર્વવેદો ગીયમાનો ભવતિ । યસ્મિન્નાવરણે શ્રીરાથિકાયાઃ સ્વાઙ્ગાત્ સમ્ભાવિતાઃ સખ્યઃ ક્રીડાપરા ભવન્તિ । સોત્સાહા સોત્કણ્ઠા પ્રેમપ્રેક્ષણા । હાસ્યવતી કટાક્ષગુણવતી સુસ્નેહા મલિના શય્યોપકરણા પુષ્પવતી નિઃશઙ્કા નિર્લજ્જા સુરતોત્કણ્ઠા સુરતાનન્દા માલાવતી સુખશ્રમા કલાવતી કલાકોવિદા ગુણજ્ઞા શ◌ૃઙ્ગારરસા કામભાવિતા ભાવોત્સાહા નિદ્રાજાગરિતા સરસસુખેત્યાદિનાનાસખ્યો રતિશ◌ૃઙ્ગારમનુભવન્ત્યો ભવન્તિ । નિરન્તરં તા સખ્યઃ ક્રીડાપરા કુઞ્જાન્તરે રસિકાનન્દં સેવમાના ભવન્તિ । લતાન્તરે ભક્ષ્યભોજ્યાનિ તામ્બૂલાદ્યા ભોગાઃ કામકેલિરસાન્તરે સુખભોગરસકીડાઃ કૃતવત્યો ભવન્તિ । એતાં લીલાં સંસિદ્ધાઃ સખીનાં ગણાઃ ષક્ષિણાં ગણાઃ પ્રાપ્તવન્તો ભવન્તિ । સાધનસિદ્ધાસ્તસ્મિન્નાવરણે ક્રીડાપરાઃ ભવન્તિ ॥

સા લક્ષ્મીરુવાચેદમ્ । કેન સાધનેનેદં સ્થાનં દૃષ્ટિગોચરં ભવતિ ।

સ હોવાચ । સૃષ્ટૌ ત્રયો યોગા ભવન્તિ । જ્ઞાનયોગઃ કર્મયોગો ભક્તિયોગશ્ચેતિ । તેષાં ત્રયાણાં યોગાનાં મધ્યે પ્રેમ્નયોગોઽતિરિક્તો ભવતિત્સામ્ । યેષામેવ પ્રેમસમ્પત્તિસ્તેષામેવ સુરતાનન્દસુસખં ભવતિ । ન ધર્મેણ નેષ્ટાપૂર્તેન ન વર્ણેન નાશ્રમેણ ન તીર્થેન ન વ્રતેન ન દેહશોષણયોગેન ન વેદોદિતેન કર્મણા । ન ધર્માધમવિચારસાધનેન તત્સ્થાનં ભવતિ । યો મનસિ ન્તિન્તરં તદ્ધ્યાનાન્નો ભવતિ તસ્ય ભવતિ । યત્ર યત્ર સ્થિતં તત્ર તત્ર તમેવ ધર્મં જાનીમહે । તમેવ સુખં જાનીમહે । તદ્ધાનિઃ તદન્તરાયઃ । તદેવ સુખં યત્ તદ્ભક્તૈઃ સહ સમ્ભાષણાત્તસ્યાવરણલીલાવાર્તાયાં કાલનિર્યાપણમ્ । ગૃહોત્સવે યેષામુપાર્જિતવસ્તુમાત્રં તદર્થે વિનિહિતં ભવતિ તે તલ્લોકં પ્રાપ્નુવન્તિ । અહો લક્ષ્મિ ઇયં સૃષ્ટિસ્તુ રસરૂપિણી ભવતિ । તેષાં રસમાર્ગવ્યતિરિક્તા ધર્મા બાધકા એવ ભવન્તિતરામ્ । મનઃસઙ્ગ્રહમાનીય મનસા ભાવેનેન્દ્રિયાણિ મનસિ ધૃત્વા મનસા ભાવેન અહોરાત્રં લયમાપદ્યન્તે । યસ્મિન્નાવરણે મનો નિમગ્નતાં પ્રાપ્નોતિ । તયા નિકુઞ્જદેવ્યાનુગૃહીતો રાત્રૌ દિવા કાલેઽકાલે તન્માર્ગીયસ્તલ્લોકં સેવમાનો વતિ । અહો મનસો વૃત્તિરતિતરાં ચઞ્ચલાપિ તે ભક્તાઃ સંસારાસક્તિરહિતા
લોકેઽનેષણાત્માનસ્તન્મયા અનપેક્ષાશ્ચિત્તે સમ્પૂર્ણાઃ પ્રશાન્તાઃ સમ્રદર્શિનો નિર્મમા નિરહઙ્કારા નિર્દ્વન્દ્વા નિષ્પરિગ્રહા ભવન્તિ ॥ તેષુ નિત્યં મહાભાગાઃ અન્યમાર્ગરહિતા હિ યે આત્માનં તન્મયં પશ્યન્તસ્ત એવાત્માનં સેવન્તે । યે તન્માર્ગીયાઃ સન્તઃ સદોપાસકાસ્તેષાં પ્રેમલક્ષણકાષ્ઠાપ્રતીક્ષા ભવતિ । અહો ચતુર્થાવણં મહાસ્થાનમ્ । યસ્મિન્નાવરણે સ્વામિન્યાઃ સ્વયં વિહારસ્થલમસ્તિ । શતસહસ્રકુઞ્જા નિકુઞ્જા લતાવતી સુવર્ણવર્ણા વિદ્રુમલતા અમલા નિર્મલા વ્યક્તમુક્તાલતા ભ્રાજમાના આસાં સખીનાં સઞ્ચારોઽત્ર સ્થાન આસ્તે । સૂક્ષ્મલતાન્તરે શય્યોપકરણાનિ । અનેકલતાન્તરે રાસક્રીડા મવતિતરામ્ । અયં રાસઃ સહજસંવલિતો ભવતિ । તસ્મિન્નાવરણે અતિક્રીડાપરાણિ રૂપાણિ કૃત્વા રાસલીલાસુખમનુભવન્તી સા વ્રજેશ્વરી રસિકાનન્દેન સહ સઙ્ક્રીડમા આપદ્યતે ।

પઞ્ચમમાવરણં તેજોમયમ્ । અમૃતમય્ય ઓષધયો રાજમાનાઃ ફલપુષ્પયુતાઃ પક્વફલરસયુક્તા ભવન્તિ ।
અન્નરસાઃ સુપચ્યમાનાઃ સરસાઃ કટુતિક્તમાધુર્યમિષ્ટરસસંયુક્તા અનેકશઃ સ્થાનેષુ તયા શ્રીરાધિકયા સેવ્યમાના રસિકાનન્દેન સમ્ભોક્ષ્યમાણાઃ
વિરાજમાના ભવન્તિ । આત્માવિર્ભાવેન નાનાસુખં ભવતિ । ભોગસ્થાનં ભવતિતરામ્ । સ્થાને સ્થાને તસ્મિન્નાવરણે રતિસુખં ભવતિતરામ્ ।

ષષ્ઠમાવરણં તેજોમયમ્ । યસ્મિન્ હાટકમયાનિ મન્દિરાણિ વિરાજમાનાનિ ભવન્તિ । શતં મન્દિરાણિ તેજોમયાનિ યત્ર રાજન્તે । સુવર્ણજટિતમણિભિરાક્રાન્તાશ્ચામીકરખચિતા મઞ્જૂષાઃ શોભાયમાના ભવન્તિ । યત્ર રાજમાનાનિ હાટકમણિજટિતાનિ ભૂષણાનિ યથાયોગ્યાનિ વસ્ત્રાણિ ભવન્તિતરામ્ । યત્રાવરણે સમ્ભોગસ્થાને સખીનાં સમૂહાઃ શ‍ૃઙ્ગારવત્યાદયો રાજમાના ભવન્તિ । આત્માનં શતધા કૃત્વા અનેકભોગરસરતિસુખં સમ્ભોક્ષ્યમાણાઃ ભવન્તિ ।

સપ્તમાવરણં ક્રીડાસ્થાનં સહસ્રયોજનાયતમ્ । પરિતઃ પરિતો મણિસ્તમ્ભા અતિરસાઢ્યાઃ સુગન્ધાઢ્યા ભવન્તિ । અતિરસગુણાઢ્યા ભૂઃ હાટકસુગન્ધકોમલા આવિષ્ટસુખાઠ્યા ભવતિતરાં સમ્ભોક્ષ્યમાણૈવ । યત્ર વલ્લીનાં સઞ્ચારાઃ પરાપરસઞ્ચારા એવાસતે । હાટકજટિતમણિજ્યોત્સ્નાભિઃ સર્વે પ્રતિબિમ્બિતં વસ્તુમાત્રમ્ । તત્ર કલાવતી ગાનવતી સુગન્ધા નૃત્યપરા વિશદા ભોગપરા ભોગવતી ભોગાભિજ્ઞા રતિકલાભિજ્ઞા કામસુખા કામાતુરા નિઃશઙ્કા સદાનન્દા સુરતસુખા સુરતાનન્દા સુરતમગ્ના આસનભેદાભિજ્ઞા અતિરસદાનાભિજ્ઞા રસદા રસદાતૃભોગાભિજ્ઞા એતાઃ સખ્યઃ સંસિધ્દ્વા અન્યાઃ સાધનસિધ્દ્વા અનેકકલાકોવિદા ભવન્તિ । તત્ર મણ્ડલાવરણે મહાસ્થાનં સશય્યોપકરણમ્ । કલાવતી શય્યોકરણાનિ કરોતિ । સુરતોત્સાહા સુરતોત્કણ્ઠાં દદાતિ । નિર્લજ્જા નિશ્શઙ્કં સુખં દદાતિ । સુરતોદ્ગમા આલિઙ્ગનચુમ્બનનમિતપ્રેમભરરસસુખં દદાતિ । રતિવતી રતિસુખં દદાતિ । રતિકલ્લોલા રતિભરરસાલસ્યમુકુલિતનયના કેલિસુખં દદાતિ । નિભૃતનિકુઞ્જગૃહં ગતયા તયા દેવ્યા સહ રસિકાનન્દઃ સુખમનુભવન્નાસ્તે । તસ્મિન્નિકુઞ્જે સુરચિતા સખી પ્રતિકુઞ્જં શય્યાસુખં કરોતિ । એકા કલહંસી નિરન્તરં તસ્મિન્નાવરણે સખીનાં મણ્ડલે મધ્યસ્થા સદા ક્રીડાપરા કલશબ્દેન તાં શ્રીરાધાં રસિકાનન્દં ચ ક્રીડમાનાઽભ્યેતિ । તસ્મિન્સમયે સુસ્વરકણ્ઠેન સૂક્ષ્મસ્વરં યથા ભવતિ તથા તં ગાયમાના ભવતિ । માનલીલાયાં રસિકાનન્દવચનાત્તાં વ્રજેશ્વરી પ્રસાદયતિ નિરન્તરમતિમનોત્સાહં ચ દદાતિ । સા વ્રજેશ્વરી કલહંસી પ્રત્યાપદ્યમાનૈવ ભવતિતરામ્ । સા કલહંસી રસિકાનન્દસ્યાતિતરાં વલ્લભતયા સુખમનુભવન્તી સંરોચતે । સા સદા જાગરિતા સા સદા ગુણજ્ઞા સા સદા રસસુરતભોગજ્ઞા ભવતિતરામ્ । સા કલહંસી સર્વાસાં સખીનાં મનાંસિ પ્રતિહરતિ સ્વક્રીડયા । સા કલહંસી રસિકાનન્દસ્યાતિવલ્લભા ભવતિતરામ્ । સા કલહંસી સાધનસિદ્ધૈવેતિ ।

સા લક્ષ્મીઃ પુનરુવાચેદમ્ । અહો! કલહંસી પૂર્વં કેન સાધનેનેદં સ્થાનં પ્રાપ્તવતી । મહાસ્થાનં પ્રાપ્તવતી । અત્યાશ્ચર્યમ્! નિરન્તરં કેન સાધનેન શ્રીરાધાયાઃ ક્રીડાસખી ભવતિતરામ્ ।

સ હોવાચ નારાયણોઽયમ્ । સા કલહંસી સૃષ્ટ્યાદૌ બ્રહ્મણઃ પુત્રી સરસ્વતી । સર્વવિધાઃ પ્રભવા યસ્યાઃ સકાશાદુત્પદ્યન્તે । ચત્વારો વેદા ઉપવેદાઃ પુરાણાનિ ધર્મશાસ્ત્રાણિ પૃથિવ્યાં યાનિ વર્તિષ્યમાણાનિ તાનિ તસ્યા ઉત્પદ્યમાનાનિ ભવન્તિ । સા બ્રહ્મણઃ પુત્રી આપ્તયૌવનૈવાસ્ત । સા એકસ્મિન્ સમયે મમ લોકં પ્રાપ્તા મમોપાસનાં ચક્રે । સ્વસુખાર્થં મમ ધ્યાનાપન્નાઽભવત્ । બહુકાલં મામુપસેવમાનાઽભવત્ । તસ્યા ભજનેન પ્રસન્નોઽહં મમ લીલાસ્થાનં વૈકુણ્ઠં દર્શિતવાન્ । તસ્મિન્ ત્વયા મયા ક્રીડિતાનિ સ્થાનાનિ સંરાજન્તે । યત્ર વૈકુણ્ઠે અનેકશો ભક્તા જયન્તકુમુદજયવિજયગરુડાદ્યાઃ શતશઃ પાર્ષદા રાજમાના ભવન્તિ । યત્ર ચતુર્ધા મુક્તયઃ સેવ્યમાના આસતે । યત્ર વનાનિ કોટિશોઽતિતરાં સન્તિ । સા વાગ્દેવ્યતિતરામુત્કણ્ઠમના અત્યન્તં સુખસમાવિષ્ટમના મમ કૃપાદૃષ્ટ્યા સુખં પ્રાપ્તા મહાલીલાં પ્રાર્થયામાસ । તદા મયોક્તા સા વાગ્દેવી ત્વં વ્રજવાસે વ્રજ । પૃથિવ્યામચ્છોદં

નામ સરઃ કામવને સુગન્ધશિલાયામસ્તિ । તત્રાચ્છોદે મજ્જયિત્વા સુગન્ધશિલાયાં વ્રજેશ્વરીં ધ્યાયમાના રસિકાનન્દેન સહ આપદ્યસ્વૈતિ । તત્ર તત્સ્થાને સર્વાત્મભાવેન પ્રીતિરુત્પદ્યમાના ભવતિ । પ્રેમાનન્દમનુભવન્તો ભક્તાસ્તલ્લીલોપયોગ્યા ભવન્તિ । સા નિરન્તરં વૃન્દાવનં કામવનં શ્રીગોવર્ધનભુપસૈવમાનાસેદુષી । અચ્છોદેઽપ્સરઃ પુષ્કરિણ્યાં નિરન્તરં મજ્જમાનાઽભવત્ । શતં સમા બ્રજલીલાં સેવમાનાઽભદ્ઘ । એકસ્યાં કાર્તિક્યાં પૌર્ણમાસ્યાં તસ્મિન્ તદ્વાસિનો રાસલીલાં કુર્વન્તિ । બહવો ભાગવતાનાં સમાજે કલહંસીરૂપં વિધાય તા લીલામદર્શયન્ । નિશિ દિને સા વ્રજેશ્વરી રસિકાનન્દેન સહ દર્શનદૃષ્ટિગોચગે ભવતિતરામ્ । અત્યાનન્દરૂપે સખીનાં સમૂહમધ્યસ્થે મહાક્રીડાપરેઽતિમહામોહનરૂપં દૃષ્ટ્વા ઇન્દ્રિયશુદ્ધિપ્રેમ્ણા ભાવાપન્નાઽભવત્ । પ્રસેદુષ્યતિસુકોમલલાવણ્યા સા વરં વરયેત્યાહ ।

સોવાચેદમ્ । યદિ દેયો વરસ્તર્હિ મહાલીલાયાં સદાહં સહચારિણી ભવામિ । કિમન્યેન વરેણ । અયં તાવન્મનોભિલાષો યલ્લીલા દૃશ્યતે । તથેત્યુક્ત્વા સા તાભ્યાં સ્વસ્થાનં યયૌ । યા સા તદ્દિનમારભ્ય ક્રીડાપરા ભવતિતરામ્ । કુઞ્જે નિકુઞ્જે તેનૈવ કલહંસીરૂપેણ પ્રતિશાખં લીયમાના સામગાનેન મનોભાવેન સ્તૌતિ નાનાકૌતુકક્રીડામકરોત્ । સા મહારમણસ્થાનં પ્રાપ્તા । મહાલીલાયાં મગ્ના રતિસુખમનુભવન્ત્યાસ્ત । સા કલહંસી સ્વયૂથં વિધાય કદાચિત્સમયે રાત્રિપરભાગે સુરતોત્થિતાં લીલામગાયત્ । કદાચિન્મજ્જનલીલામાગાયમાના ભવતિ । શૃઙ્ગારલીલાયાં શૃઙ્ગારં પ્રતિ પ્રતિક્ષણં સ્તનસ્વાવિર્ભાવરતોદ્ભવા ભવતિતરામ્ । લીલામાગાયમાના સમ્ભોક્ષ્યમાણા ભવતિ । ભોગાવસ્થાયાં સ્રક્ચન્દનતામ્બૂલાગુરુરસમૃગમદકર્પૂરકેસરસંવલિતાન્યાસ્તરણાનિ પ્રતિક્ષણં નૂતનાનિ । અનેકશય્યાયાઃ સુગન્ધશૃઙ્ગારાદુપરિપ્રફુલ્લિતગ્રથિતપરસ્પરશુભાઙ્ગશોભનચન્દનવૃક્ષાલમ્બિતાઃ સુવર્ણગન્ધેન યુતા લતાન્તરાઃ સન્તિતરામ્ । તત્ર શૃઙ્ગારે રતિશૃઙ્ગારરસસ્થાનં સઙ્ગાયમાના ભવતિતરામ્ । ભૂષણસ્થાનં સુગન્ધં સુવર્ણમ્ । સુવર્ણજટિતા મણયઃ સુષ્ઠુ ગન્ધેન પૂર્યમાણા ભવન્તિતરામ્ । વસ્ત્રાણ્યતિસુગન્ધેનાતિપદ્યમાનાનિ પરિધાપયતિ । એવં કલહંસી વાગ્ભિઃ સ્તુતિં ચકાર । અત્યર્થં સા નિકુઞ્જદેવ્યા ગાનવલ્લભા ભવતિ । મહાશૃઙ્ગારરસોઽયમ્ । વિધિનિષેધમાર્ગાનનુસારિણી શૃઙ્ગારરસાદનન્તરમાત્મભાવે ભવતિ । રસમગ્ના ભવતિ સમ્ભાષ્યમાણા મનોભવભાવે ભવતિ । આત્મભાવેનેયં પ્રત્યનુકરણં ક્રિયમાણમાતનોતિ । વનલીલાં મનસ્યાતનોતિ । અતિરતિં સંયોક્ષ્યમાણા કલહંસી રાત્રૌ દિવા લતાન્તરેષુ ફલમિષ્ટં મધુ રાધાયા દત્વાન્યદાસેવતે । તત્રૈકા પુષ્કરિણી મિષ્ટામૃતરસપૂરિતા ભવતિ ચતુર્યોજનાયતા । તત્ર પદ્મષણ્ડાનિ સુવર્ણસુગન્ધસુકોમલાનિ મનોહરાણિ ભવન્તિ । તસ્મિન્ પદ્મવને વિહારક્રીડાપરા કલહંસી સુરોચમાના ભવતિ । અહો લક્ષ્મિ તસ્મિન્ કેન ભાગ્યોદયેન તસ્ય નિકુઞ્જદેવ્યા અનુગ્રહેણ અનન્યાશ્રયધર્મોત્પત્તિર્યદા ભવતિતરાં તદા રતિરાવિર્ભવતિ । તાવદ્દેહોપાધિકર્મક્ષુત્તૃટ્પિપાસામોહભયદુઃખં તથા સુખાનિ તથા ન ભવન્તિ યથા દેવાદીનામ્ । વ્રતોપવાસધર્માધર્માઃ પિતૃકાર્યાકાર્યાણિ યત્કિઞ્ચિદ્ધર્માઃ શોભમાના ધર્માઃ અન્યાન્યુપવાસમયાનિ પાપપુણ્યાનિ જ્ઞાત્વા યઃ સર્વધર્માતિરિક્તો ભવેત્ સ એવ તન્મણ્ડલં પ્રાપ્નોતીત્યાહ । અહો રમ્યં પુણ્યમાચરેત્ । અતિતતરાં ભાવો ભવેત્ । સમ્ભોગલીલાયાં સુરતાનન્દોઽયં લોકઃ સોઽવશિષ્યતે । સુરતાનન્દસુખમનુભવન્તો ભક્તા આત્માનં તન્મયતાં નયન્તિ । ધર્માધર્મૌ ત્યક્ત્વા સમાઃ સહજભાવા ભવન્તિ । અતિરસમગ્ના

વિદ્યાતપોધ્યાનમૈત્રીકલાગુણસંયુક્તાશ્ચ ભવન્તિ । અન્યપ્રતિપત્તિસહિતો નાસ્તિકો ન લભતે તલ્લોકપ્રાપ્તિમ્ । અહો લક્ષ્મિ કદાચિન્મહાભાગ્યોદયેનં અસ્મિન્નાવરણે પ્રીતિરાસ્તે । યત્ર વૃક્ષાઃ ફલૈર્નમ્રાઃ પુષ્પમિષ્ટામૃતમયરસમગ્રા ભવન્તિ । યત્ર શાખાઃ પુષ્પનમ્રા ભવન્તિ । પઞ્ચમે આવરણે સંસિદ્ધાનિ શુકપિકયૂથાનિ સંરાજમાનાન્યાસતે । કેચિદામ્રવૃક્ષાઃ પક્વફલાઃ સદા સમ્ભોક્ષ્યમાણા આસતે । અતિરસમગ્રાઃ સાધનસિદ્ધ એકઃ શુકોઽયન્તવલ્લભોઽસ્તિ । યસ્ય પક્ષચઞ્ચુકાઃ સા વ્રજેશ્વરી સ્વહસ્તેન માર્જયતિ । રસિકાનન્દોઽપિ સ્વહસ્તેન ભક્ષં દદાતિ । તસ્ય સહચારિણ્યેકા શારિકા આસ્તે । સા સાધનસિદ્ધા ભવતિતરામ્ । તચ્છુકશારિકામિથુનં રસિકાનન્દક્રીડાયાં સહચાર્યેવ ભવતિતરામ્ । તત્ર રસિકા સા શારિકા નિરન્તરક્રીડાપરા ભવતિ । સુવર્ણવર્ણાસુ ભૂમિષુ રત્નપરિધિષુ સશય્યોપકરણં વિહારસ્થલમ્ । તત્ર વૃક્ષસઞ્ચારાઃ સુશોભાઢ્યા ભવન્તિતરામ્ । તત્ર શુકશારિકાઃ સાધનસિદ્ધાઃ ક્રીડાપરા ભવન્તિ । અત્યાસક્તા મહાક્રીડાયાં સમ્ભવન્તિ । અહો રસમાર્ગોઽયં દુર્લભતરોઽપ્યાસીત્ । અહો મહાભાગ્યવશાત્તસ્યાઃ નિકુઞ્જદેવ્યા અનુગ્રહાદત્યન્તપ્રિયતમો ભવતિ । પ્રીતિઃ પ્રીત્યા ભવતિ ભક્તિર્ભક્ત્યા ભવતિ સ્નેહઃ સ્નેહેન ભવતિ તસ્માદ્ભાગ્યોદયાદતિતરામાસેદુષઃ । અહો ભાગ્યવન્તઃ કૃતકૃત્યવન્તઃ સર્વે તીર્થવન્તો ભવન્તિ । અતિરસમગ્રાઃ અતિભુઞ્જાના અત્યન્તસુખમનુભવન્તિ । ય ઇમાં લીલાં સમ્ભુઞ્જમાનાઃ ભવન્તિ ય ઇમાં લીલામુપાસમાના એવ ભવન્તિ તે ભક્તા ભવન્તિ । યદા મહાભાગ્યોદયો ભવતિતરાં તદાસ્યા લીલાયાં પ્રત્યયો ભવેત્ । તે ધર્મકારિણઃ, તે વ્રતકારિણઃ । યેષાં લીલાયામુપાસનારુચિરાસ્તે તે વ્રતકારિણો ભવન્તિ । યસ્ય મહાલીલાયાં મનોઽભ્યેતિ । યો વિધૌ ચ પ્રતિષેધે ચ નિર્વિઘ્ન અસ્યાં લીલાયાં મનોભાવાપન્નો ભવેત્ સ એવ લીલોપયોગ્યો ભવેત્ । યે પ્રત્યયકારિણઃ તેષામનુગ્રહઃ ।

સા લક્ષ્મીઃ પુનરુવાચેદમ્ । રહસ્યલીલાયાં મનો ભાવાપન્નં ભવતિ । અત્યન્તરત્યાવિષ્ટચિત્તા ભાવાપન્ના ભવામિ । કઃ શુકઃ? કા શારિકા ભાવાપન્ના યસ્યાં રસિકાનન્દોઽત્યન્તસ્નેહાવિષ્ટમના ભવતિ સા વ્રજેશ્વરી અત્યન્તં સ્નેહં ચકાર । અતિદુર્લભતરં સ્થાનં પ્રાપ્તમ્ । અવિચ્છિન્ના રતિગતિયોગ્યતા સંયોક્ષ્યમાણા ભવતિતરામ્ । સ હોવાચ નારાયણોઽયમ્ । શ ૃણુ લક્ષ્મિ આદૌ સૃષ્ટેઃ સુમન્તો નામ બ્રાહ્મણઃ કૌશિકગોત્રાત્સસમુદ્ભૂતો ભવતિ । સ કાન્યકુબ્જદેશે સમુદ્ભૂત આસીત્ । અતિતરાં ભાવાપન્નોઽભવત્ । તસ્ય મનોરમા ભવત્યતિશયભક્તિમાર્ગરતા । તૌ દમ્પતી અતિસુભગાવતિતરસ્નેહસમ્પન્નૌ નિરન્તરસેવાયાં સંયોક્ષ્યમાણરતી આસાતામ્ । તૌ દમ્પતી અતિસ્નેહેનાવિષ્ટચિત્તૌ કાલે કાલે તાં વ્રજેશ્વરી રસિકાનન્દેન સહ ઉપસેવમાનાવાસાતામ્ । તાવતિવનલીલાયામત્યાસક્તૌ ભવતઃ । કસ્મિન્ કિયદ્ભાગ્યોદયેન ભક્તાનાં સઙ્ગેન વનં વૃન્દાવનં પ્રાપ્તૌ? તત્ર વૃન્દાવને કામવને કદમ્બખણ્ડે વૃષભાનુપુરે નન્દગ્રામે પાવનસરસિ પ્રતિપદ્યમાનાવભવતામ્ । એવંવિધે રહસિ ક્રીડાવિહારે કિયત્કાલં વાસમાલમ્બ્ય તિષ્ઠન્તાવભવતાં? દમ્પતી સાભિલાષૌ વને અત્યાસક્તાવભવતામ્ । મનોરથેન સહ વ્રજેશ્વરી રસિકાનન્દેન સહ દૃષ્ટિપથમાપેદે । મહાલીલાયાં ક્રીડાપરૌ સમ્ભાષમાણૌ સંયુઞ્જાતામ્ । તદ્દિનમારભ્ય તૌ દમ્પતી મહાલીલાયાં ક્રીડાપરાવભવતામ્ ।

સા લક્ષ્મીરુવાચેદં રહસ્યમ્ । વ્રજવાસિનીસૃષ્ટિઃ કીદૃગ્વિધા? યે સંસિદ્ધાસ્તે કીદૃગ્વિધાઃ? અન્યે કે જીવાઃ સૃષ્ટ્યાદૌ પ્રકટિતાઃ? જીવસ્ય કીદૃગ્વિધં રૂપમ્? બન્ધમોક્ષૌ કીદૃગ્વિધૌ ભવતઃ?

પુનઃ સ હોવાચ નારાયણોઽયમ્ । અહો! પ્રપઞ્ચોઽયમનાદિસંસિદ્ધો ભવતિ । યથા બ્રહ્મ ત્રિવિધાત્મકમ્ ।

સચ્ચિદાનન્દાત્મકમ્ । સત્તુ વ્યાપકતયાસ્તિ । તેજોમયં ચિદસ્તિ । આનન્દમયસ્તુ પુરુષોત્તમોઽતિરિચ્યતે । યથા બ્રહ્માનન્દોઽયં લોકઃ સચ્ચિદાનન્દો ભવતિ તથા જીવસઙ્ઘસ્ત્રિવિધો ભવતિ ।

સોવાચેદમ્ । કિમયં જીવસઙ્ઘો ભવેત્? તેષાં કા દૃષ્ટિઃ? કાવસ્થા ભવતિ?

સ હોવાચેદમ્ । શ‌ૃણુ । અનાદિસંસિદ્ધોઽયં જીવશ્ચિદંશો ભવતિ । સોવાચેદમ્ । યદિ ચિદંશો જીવઃ કથમજ્ઞાનેન જડતાં પ્રપદ્યતે । સ હોવાચ । યથા અનાદિસંસિદ્ધોલ્યં જીવસઙ્ઘસ્તથા માયાપ્યનાદિસિદ્ધા ભવતિ । સા ત્રિવિધા વ્યાપ્ય તિષ્ઠતિઃ । સ એવં જીવસ્ત્રિવિધો ભવતિ । સોવાચેદમ્ । જીવસઙ્ઘસ્ત્રિવિધસ્તિષ્ઠતિ । વર્ણઃ ॥

સ હોવાચ । સદ્રૂપઃ સંસારાત્મકો ભવતિ । નાનાકર્માણિ કરોતિ । વર્ણાશ્ચાશ્રમાશ્ચ ધર્માશ્ચ સાધનાનિ સંયુજ્યન્તે । તેષામુત્પત્તિઃ સ્થિતિઃ । ચિદ્રૂપો જીવો જ્ઞાની ભવતિ । સ નિષ્કર્મમાર્ગીયો ભવતિ । યે જીવાઃ આનન્દરૂપાસ્તેષાં સર્વધર્મત્યાગાત્ રસાનન્દસ્વરૂપા મહાલીલોપસેવ્યમાનાઃ આસતે । તાન્ ધર્માધર્મૌ ન બાધેતે તસ્યાં મહાલીલાયામ્ । સોવાચેદમ્ । કયા માયયા સંયુજ્યમાનો જીવઃ કર્મમાર્ગરતો ભવતિ? સ હોવાચ । માયારૂપં ત્રિવિધમ્ । યદ્રૂપં સદ્રૂપં તન્માયાસંવલિતોઽયં જીવસઙ્ઘઃ કર્મકાણ્ડરતો ભવતિ । ચિદ્રૂપયા માયયા સંવલિતો જીવસઙ્ઘઃ સંન્યાસી ભવતિ । આનન્દસંવલિતયા માયયાનન્દાત્મક એવ ભવતિ । આનન્દરસસ્તુ મહાલીલાયાઃ કારણં ભવતિતરામ્ । તેષાં કર્માણિ યાથાતથ્યેન વદામિ । તેષાં યે કર્મમાર્ગીયાઃ કર્મપ્રતિપાદકા મહાવનલીલાયામપ્રત્યયકારિણોઽસુરાઃ કર્મજડા અન્યોપાસકાસ્તદુપાધિતયાન્યમાર્ગં ન વિન્દન્તે । અગ્નેરુપાસકાસ્તે યજ્ઞકર્મવાસનાત્મકલિઙ્ગશરરિષૂત્પત્તિ ભજન્તે । તેન વાસનાત્મકેન લિઙ્ગે નોત્પત્તિસ્થિતિલયાનાપદ્યન્તે । તસ્માલ્લિઙ્ગશરીરાત્મકોઽયં જીવસ્ય સ્વભાવઃ । યદા સર્વા વાસના વિધૂય મહાલીલાયામ્પ્રવિષ્ટચિત્તો જાયતે અહો લક્ષ્મિ લીલાં જ્ઞાત્વાજ્ઞાત્વા ધ્યાયમાનો દેહજનિતકામક્રોધલોભમોહભયસુખદુખલજ્જાલજ્જા જ્ઞાનમોહમત્સરાદીનાગમમન્ત્રતન્ત્રૌષધિરસજ્યોતિષવાગ્વિલાસ પ્રપન્નાન્ નાના સંસારજનિતાનનેકશઃ સાત્ત્વિકરાજસતામસાન્ સંરાજમાનધર્માધર્માનતિતરામભિમાનગુણાન્નિરસ્યન્ મહાલીલાં પ્રવિષ્ટો ભવેત્ । આત્માનં તન્મયમાતનોતિ । અન્યત્ર ક્વાપિ વિષયાન્તરે પ્રવિષ્ટચિત્તસ્તદા તં લિઙ્ગં પ્રાપ્નોતિ ।

સા લક્ષ્મીરુવાચેદમ્ । ત્વયોક્તં જીવસ્ય માયાધીનત્વં જીવો યેન વાસનાલિઙ્ગશરીરે ઉત્પદ્યમાનો ભવતિ । કિં બલં યેન પ્રયત્નવાન્ ભવતિ સ હોવાચ । તસ્માન્મહાભાગ્યોદયેન યદૃચ્છયા ગુરુસહાયેન સઙ્ગેન સાધૂનામન્યધર્મરહિતાનાં વિધૂતપાપં મનસ્તન્મયતયા તેન માર્ગેણ લિઙ્ગશરીરં વિધૂય મહાલીલાયાં વ્રજેશ્વરી રસિકાનન્દેન સહોપસેવમાન આસીદતિ ।

સા લક્ષ્મીરુવાચેદમ્ । જીવસ્ય રૂપં કીદૃગ્વિધં કેન રૂપેણોત્પત્તિસ્થિતિલયાનાપદ્યતે સ હોવાચ । અનિર્વચનીયોઽયં જીવઃ । નૈનં છિન્દન્તિ શસ્ત્રાણિ નૈનં દહત્યગ્નિર્મારુતો નૈનં શોષયત્યાપો નૈનં ક્લેદયન્તિ । યાં યાં વાસનાં પ્રાપ્નોતિ તં તં લિઙ્ગશરીરં પ્રાપ્નુવન્નાસ્તે । અત્યન્તં વાસનાબદ્ધો જીવઃ । વાસનામુક્તો મહાલીલાયામાસક્તઃ સંસારે નનિર્વિણ્ણો નાતિસક્તો ભવતિ । સંસિદ્ધોઽયં જીવસઙ્ઘો માયોપાધિભેદેન નાનાશરીરભાવમાપ્નોતિ । અસંસિદ્ધસ્તુ રક્તશરીરસંયુક્તો ભવતિ ।

સોવાચેદમ્ । શરીરં કીદૃગ્વિધં તસ્મિન્ શરીરે કે ગુણા કે અવગુણાઃ ? કેન બન્ધઃ શરીરે? કેનૈવ મુક્તિઃ તસ્મિન્ શરીરે? કો નિરુપાધિઃ? તસ્મિન્ કિં જ્ઞાનં ભવતિ? કીદૃશેન શરીરેણ બન્ધઃ? કીદૃશેન મોક્ષો ભવતિ?

સ હોવાચ । શરીરભેદાઃ દ્વિવિધાઃ । શરીરમેવ કર્મોપજનિતં યદૃચ્છયા ચોત્પન્નં તસ્યા નિકુઞ્જદેવ્યાઃ અનુગ્રહાદ્ભવતિ । કર્મજડાનાં કર્મસમ્ભૂતવાસનાજડાત્મકં ભવતિ । યેષામનુગ્રહાત્સમ્ભવો ભવતિ તેષાં સ્નેહમાર્ગે રુચિરાસ્તે । યેષાં નિર્વાણમાર્ગે રુચિર્ભવતિ તે સંન્યાસિનો ભવન્તિ । શરીરં તુ એકાદશેન્દિયાત્મકમ્ । પઞ્ચ જ્ઞાનેન્દ્રિયાણિ ।પઞ્ચકર્મેધ્યિદ્રયાણિ । ઉભયાત્મકં મનો જાયતે । પઞ્ચ મહાભૂતાનિ પઞ્ચ તન્માત્રાણિ । ત્રયો ગુણાઃ । પઞ્ચવિંશત્તમો જીવઃ । ષડ્વિંશકો મહાવિષ્ણુઃ સદા દ્રષ્ટા ભવતિ । ઇમે જીવાઃ શરીરોપાધિં ભુઞ્જાનાઃ સુખં દુખં પ્રાપ્નુવન્તો ભવન્તિ । સર્વેષાં શરીરાણાં સમાનગુણા ભવન્તિ । રાગાદયઃ કામક્રોધલોભમોહજરામરણસુખદુઃસ્વાન્યનુભવન્ત આપદ્યન્તે । ઇદં શરીરં જરયા ગ્રસ્તં ગન્ધર્વનગરોપમં મનોરથમયં ભવતિ । તે સર્વે ગુણા લિઙ્ગશરીરોદયાદપેતા લિઙ્ગં વિધૂયાપ્માનં તન્મયતાં નયન્તિ । તે રાગાદયો દોષાઃ શરીરસંવલિતાઃ । તે કામક્રોધાદયસ્તદર્થે પ્રયુજ્યમાનાઃ સાધનરૂપા ભવન્તિ ।

સોવાચેદમ્ । કથં રાગાદયઃ સાધનરૂપા ભવન્તિ? યેષાં સંસર્ગાત્ વિકલતાં પ્રપેદિરે । ભગવદર્થે પ્રયુજ્યમાનાઃ રાગાદયઃ કથં નિષ્કર્મતાં પ્રાપ્નુવન્તિ? એષ કામ એષ ક્રોધ એષ લોભ એષઃ મોહ ગરયાત્મલીલાર્થે જીવં પ્રયોજયતિ । સ હોવાચ । માયા ત્રિવિધા ભવતિ । સદ્રૂપયા માયયોત્પાદિતાઃ કામક્રોધાદયો ગુણાઃ સંસારોત્પત્તિપ્રયોજકાઃ ભવન્તિ । ચિદ્રૂપે આશ્રિતા જીવાસ્તે તાન્ ગુણાન્ પ્રપદ્ય જડતાં પ્રપેદિરે । આનન્દરૂપે આશ્રિતા જીવાસ્તન્મયતાં પ્રપેદિરે । સંસારિતોઽયમાનન્દમયો રસ આત્માનમાનન્દમયતયા પ્રપદ્યતે । રાગાદયઃ કામક્રોધાદયો ગુણાઃ સાધનરૂપા ભવન્તિ । અહો! રસમાર્ગ પ્રપદ્યમાનોઽયં જીવસઙ્ઘ આત્માનં તન્મયતયા ધ્યાત્વા વાસનાત્મકં લિઙ્ગં વિધૂયાત્મભાવમભ્યસ્ય તન્મયતાં પ્રાપ્નોતિ । યાં યાં વાસનામાત્મા વિલાપયમાનો ભવતિ તત્તદ્ભાવેન તત્તલ્લિઙ્ગં વિલીયમાનં ભવતિ । અત્યન્તાસક્તસ્તસ્મિન્ માર્ગે લિઙ્ગં વિધૂયાપપાપ્મા ભાવાપન્નો ભવેત્ । યો માર્ગસ્તે કથિતોઽયં માર્ગો દેવાદિના ન જ્ઞાતઃ । રુદ્રાદિના ન જ્ઞાતઃ । તન્મણ્ડલમુપાસમાનસ્તન્મયતાં પ્રપદ્યતે । ઇદં રહસ્યં કથિતમ્ । ન વચનીયં કસ્ય ચિત્ત્વયા । સ્વેષ્ટં હૃદિ ધ્યાત્વા તદ્ભાવેન પ્રલીયતે । અહો લક્ષ્મિ ઇમં માર્ગ સમાશ્રિતા ભક્તાઃ શરીરોપાધિધર્માન્ મુક્ત્વા તદ્ગુણતાં પ્રાપ્નુવન્તીતિ સામગા નિરન્તરં રહસિ સઙ્ગાયન્તો ભવન્તિ ॥

યદક્ષરપદભ્રષ્ટં માત્રાહીનં ચ યદ્ભવેત્ ।
તત્સર્વં ક્ષમ્યતાં રાધે પ્રસીદ હરિવલ્લભે ॥

ઇતિ સામરહસ્યોપનિષત્ સમાપ્તા ।

અસ્યાઃ “રસિકાનન્યોપનિષત્” ઇત્યેવ નામ સુવચમ્ ।

Proofread by Mohan Chettoor

*Samarahasyopanishat*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*